प्रवेश सं० विषयः धर्मशास्त्रम् क्रम सं०

नाम त्रिस्थली सेतु: "गया प्रकरणम्" ग्रन्थकार श्रीनारायण भट्ट:

पत्र सं० १-४७

श्लोक सं० अक्षर सं० (पंक्तौ) ५१ पंक्ति सं० (पृष्ठे) ८

आकार: १०.०×३.४ लिपि: दे.ना. आधार: का.

वि० विवरणम् पू.

अा. ८१६७

पी० एस० यू० पी०—७७ एस० सी० ई०—१६५१—५०००

13887

Indira Gandhi National Centre for the Arts

१३३०

पुन्ने ५५

वे॰ संभु ८३

गन्धागमन-अमरीकी (ग।

नं. ३१२६

तिरस्थुलीसोतु गया प्रवेरया पजापते ४०

Indira Gandhi National
Centre for the Arts

ग॰त्र ॥१॥

श्रीगणाधिपतये नमः ॥ ॥व॥

गुरुर्जयति ॥ १ ॥ नत्वाखिलोद्धारधुरंधरं परं गदाधरं गुरुं ... वकं । सदहमुत्साय ... दरं मया मया कार्यमुदीर्यते धुना ॥ २ ॥ सुतादिकर्तृकं यस्या श्राद्धं त्रयहासमेक्षितं । पित्राद्युद्देश्यफलदे सा गयायागतो विका ॥ ३ ॥ ननु पुत्रादिकर्तृका छागङ्छागहोद्देश्यपित्रादिषु स्वर्गादिफलं भवतीत्यनुपपन्नं कर्मशक्तेः कर्तर्येव फलजननात् । शास्त्रीयं फलं प्रयोक्तरि तल्लक्षणत्वादिति तातीयन्यायात् । अन्यथातिप्रसंगात् । यद्यपि च जातेष्टाविवाकर्तर्यपि फलमुच्यते तथापि श्राद्धे पित्रादीनां देवतात्वात्तस्यां च कर्मणा फलाजननात्तज्जननेवा तस्याधिकारित्वापाताद्देवतात्वानाव पत्तेरुभयरूपतायां च फलत्वात्केनाधिकारिका रितयाकर्मप्रतिप्राधान्याद्देवतात्वेन च तत्प्रत्येव गुणत्वादेकप्रतियोगिकैक निष्ठगुणप्रधानतावरूपवैरूप्यस्य च वाजपेयाधिकरणन्यायेनासंभवाज्जातेष्टौ पुत्रस्य देवतात्वाभावे

तेषां विरोधानामभावादकर्तृनिष्ठफलजननेन च कर्तुरप्रवृत्त्यापत्ते विधेः कर्तव्यसमीहितसाधनतावगमकत्वपवर्त्तकत्वव्याघातात्स्वगतफलोत्तरार्थप्रवृत्तौ च तात्पर्येतैव प्रवर्त्तकतादिनिर्वाहात् पित्रादिगतफलाभावापत्तेरन्यतरेणाचोपपन्नात्स्वलयगतफलांगीकारकल्पना । हेशायोगात् विश्वजितफलश्रुतेरर्थवादतयाप्युपपत्तेरकर्तृगामित्वे च फलस्य गयागत्वा प्रकुर्वीत श्राद्धं पुत्रः समाहित इत्यात्मनेपदानुपपत्तेस्तु पपत्तिरेवा यदा च शास्त्रफलशब्देनापूर्वमुपादीयते तदापूर्वस्य प्रयोक्तात्मकर्तृगामित्वात्फलोक्तरावस्थायाएवापूर्वत्वादपूर्वफलयोश्च सामानाधिकरण्यनियमादन्यत्रापूर्वमन्यत्र फलमित्यतिप्रसक्तेर्न गयाश्राद्धात्पित्रादिनिष्ठफलोत्पत्तिरिति चेत् ॥ अत्रोच्यते ॥ यथा यस्मिन्जातएतामिष्टिं निर्वपतिपूत एव स इति शास्त्रवर्त्तनातीयन्यायेवाधिवाकर्त्रीयपि पुत्रे फलमेवमत्रापि वचनप्रमाणानानापुराणवचनश्रुतिपित्रादिषु फलोत्पत्तिः । फलसंयोगश्च चोदितेनस्यादशेषभूतत्वादिति वा तुष्टिकन्याया

वे॰ ॥ श्रा॰

Indira Gandhi National
Centre for the Arts

।२॥ त्वान्वातिप्रसंगादि। शास्त्रस्यैव नियामकत्वात्। देवतासंस्कारके चावाहनादि निर्देवतायामपि संस्कारारम्भफलजन
नात्। प्रधानफलस्यापि वचनान्तरामिता। नास्ति क्वचित्स्यात्तिभार इति न्यायात्। वचनाद्वोभयरूपतया यागादीकर्त
रीष्टेवा कार्तृतया गुणभावात् फलित्वेन च बाधाच्यात्। न च वैरूप्यं। सकृदुच्चारणे हि तत्। असकृदुच्चारणेत्वेकस्यापि यागा
कर्तुरिव तानु विरोधाय। सकृदुच्चारणेपि क्वचिद्वयत दि... प्रयनं प्रति संस्कार्यत्वादर्शनात्तानं प्रतिच
गुणभावत्वं दर्शी क्रियते किन्तु तासकृदुच्चारणे। न च विधेः प्रवर्तकताव्याघातः आरब्धसत्रक... तत्पु
त्रादिवज्जातेष्टौ च पित्रवदन्यफलस्यापि कर्तृसमीहितत्वेन तत्साधनतावोधनेन प्रवर्तकतोपपत्तेः। अतएव कर्तृ... इति
रप्युपपन्ना। न चात्मनेपदानुपपत्तिः। न हि कर्तृसमवेतता कर्त्रभिप्रायता। आधानजन्याहवनीयत्वादिफलस्यातिसम ॥२॥
वेतत्वेनाग्निमादधीतेत्यात्मनेपदानुपपत्तिप्रसंगात्। किं तु कर्तृसमीहितत्वं। तथा च जातेष्ट्या पुत्रगतपूतत्वादिजनने

पित्रग्निसाध्यकर्मजन्यफलस्यात्मीयत्वावोधकाधानवाक्यानामात्मनेपदवदत्रापि तदविरोधः। पितृगतफलस्यापि क
र्तृसमीहितत्वात्॥ किं च॥ न चात्र पुत्रब्रह्मवर्चसादिफलमपि तु स्वपुत्रब्रह्मवर्चसादितत्वं कर्तुरेव भवतीति तच्चरतो
ऽकारीत्याप्तृतत्वं च कर्तृत्वं च इह तु पितृकर्त्रस्यापि कर्तृफलत्वादात्मनेपदविरोधः। तस्माद्वचनवशाज्जातेष्टफलस्य पित्रा
दिगतत्वेन काम्यमानत्वान्तै वोत्पत्तिः॥ अपूर्वं तु केचिदाहुः। कर्तव्यं वितीया यागादेव फलं तद्धि शक्तिद्वारेणासीध्यती
ति वार्तिकाद्यागशक्त्यात्मकस्यापूर्वस्यांतरंगतया क्रियागुणवसनतात्। विहितक्रियायां कर्तव्यत्वादृष्टमिति निय
माच्च। विहितक्रियया कर्तव्यं फलमिति नियमो हि वचनेनाप्रोच्यते अदृष्टे तु तन्नास्ति। श्येनजन्यवैरिमरणवत्कर्तृ
गतादृष्टेनैव व्यधिकरणकार्यात्पत्तिमान्नदोषवनेन वचनोपपत्तेरपूर्वस्य क्रियावैयधिकरण्यतात्यर्या नावात्। वच
नाच्चापूर्वफलयोर्वैयधिकरण्यात्। तत एव नातिप्रसक्तिरपि। न्यासे कद्ध कार्यत्वमित्यापत्तिः। अदृष्टवतो व्यापकतया च

रिदि शब्दवपितृदेशेपिसत्त्वात्सर्वेषांस्त्वात्। नच काशीमरणादिपुंनोत्रापवर्गो तददृष्टनाशात् पितुर्न स्वर्गः स्यादिति वा
च्यं। अदृष्टस्य फलनाश्यतया पितृस्वर्गाभावेनाशानुपपत्तेः स्वगतभोगजनकादृष्टस्यैव मुक्तिविरोधित्वादिति। अन्येतु
॥ फलवत्यपूर्वमिति सूत्रमशक्यात्मकं वा तत्फलमेवोपजायत इति वार्त्तिकात् फलांकुरावस्थाया एवापूर्वत्वात् फलस्य च
वचनात्पितर्युत्पत्तेः। विहितक्रियाकर्तृगतव्यापारद्वारा फलजनिकेत्युत्सर्गोप्यत एव बाध्यते। यत्त्वंतरंगतया फलोपपा
दकत्वाच्च फलाश्रये तत्कल्पनमिति। तन्न। साधनांतरंगतया साक्षात्तोपपादकतया च कर्तृग तेत्रस्यापि सुवचत्वेना
स्याति शेषकत्वात्। तस्मादुक्तयुक्त्येवापूर्वं कर्तरि फलिनि वा। फलं तु वचनात् पित्रादिष्विति। पित्रादिस्वर्गकाम पुत्रादि
कृत कूपारामहादाना दिविषयमेवत्यायः। नचैवं दृशेष्वपि पित्रादिगतं फलं तर्हि काशीमरणादिनापूर्वमेवमु
क्तेपितरि सांगस्यापि वैदिककर्मणो वैफल्यापत्तिः। अत्र केचित् फलिगतादृष्टोत्पत्तिपक्षे मुक्तेपितरि दोषाभावा ॥४॥

॥योगिष्विव विहितक्रियाभिनादृष्टजनिका। अदृष्टोत्पत्तौ स्वरूपसतो दोषस्यांगस्यैव गुणपातायथाविघ्नहेतुदुरितशू
न्येनानुष्ठितं मंगलं दुरितध्वंसं न जनयति स्वरूपसतो दुरितस्यांगस्याभावादिति। तन्न। अंगत्वावेदकश्रुत्याद्यभावात्।
। दुरितध्वंसे तु ध्वंसप्रागभावादेव प्रतियोगितयात्तदपेक्षा। अपेक्षा वाः पूर्वोत्पत्तावंगता। तथापि कर्मणि बालावात्सां
गकर्मणो नैष्फल्यं को वारयेत्। कर्तृगता पूर्वपक्षे चानुपपत्तिस्तदवस्थैव। अतोन्ये एवमाहुः। काम्ये अबाधितार्थविष
यकामनाधिकारिता वक्तव्यदिका। मुक्तेच स्वर्गादिकामना। याबाधितविषयत्वादनधिकारित्वादेव वैफल्यं न दोषा
य। एतच्छरीरावच्छेदेन स्वर्गार्थतया गाविमनुष्यो त्यर्थत याबाधसर्वकामावाप्तिसाधनदर्शपूर्णमासानुष्ठानवत्। इह
। फलावश्यंभावनिश्चयात्मकश्रद्धायाः कर्मगाद्वादिहच्च बाधादेव तदसंभवादंगकत्वादेव फलाभावः। इत्यन्ये तत्र
ज्ञानेरनुष्ठितकर्मस्वप्यपेवानिरिति। इदं तु मम भाति दंगमपि। जगा... नगरूं। काशीमरणादिना म... का।

Indira Gandhi National
Centre for the Arts

ग॰प्र॰ णांगयाश्राद्धानुष्ठानापत्यास्तकाले।पृष्ठापारावर॰ वर्ज्यागा॰ [illegible] पुत्रापापतीरसाते [illegible] नाय
वाधनिराकरणंचसर्वेषांगयाश्राद्धप्रयोजनमितिसमाधिःननुकथंप्रत्यवायाभावार्थतासर्ववचनेषुफलश्रवणादिति
चेत्।उ मृतेपितृऋणापाकरणस्यावश्यकत्वाद्गयापिंडदानेनपितॄणामनृणोभवेदितिवचनाद्गयाश्राद्धस्यतदर्थत्वादा
वश्यकता।जीवतोवाक्यकरणात्प्रत्यब्दंभूरिभोजनात्।गयायांपिंडदानाच्चत्रिभिःपुत्रस्यपुत्रतेतिवचनेपिऋणापाकरण
स्यपुत्रकार्यकारितापुत्रताशब्दलक्षिताप्रयोजनंगम्यते।गयायांगत्वान्नदातायःपितरस्तेनपुत्रिणइत्यत्राप्येवमेव।तस्मा
द्ब्राह्मणस्यसोमविद्याप्रजमृणवाक्येनसंयोगादितिबाधन्यायेनावश्यककर्मानुष्ठानार्थोर्थज्ञानस्यप्रयोजनद्वारेण
ध्यानयस्यैवगयाश्राद्धस्यापिप्रयोजनद्वारेणनित्यता।अतएवकौर्मेतस्मात्सर्वप्रयत्नेनब्राह्मणस्तुविशेषतःप्रदद्याद्विधि ॥४॥
वत्पिंडान्गयांगत्वासमाहितइत्यावश्यकतोक्ता।अकरणेनिंदापितत्रैव।गयाभिगमनंकर्तुंयःशक्तोनाभिगच्छतिशोचंति

पि॰ तरस्तंवैवृथातस्यपरिश्रमःइति।तस्मात्गयाकृत्यंपुत्रस्यनित्यं।अतएवयथाशक्त्यनुष्ठेयं।नित्यंयथाशक्त्यादिलुपवंधा
त्।तत्रापिसकृत्करणमेवनित्यं।तावतैवशास्त्रार्थसिद्धेः।आवृत्तिर्वोधककवीप्साद्यभावात्।चातुर्मास्यवत्।पुनःकरणे
तुफलाधिक्यंतत्तद्देव।नत्वावश्यकता।सकृद्गयाभिगमनंसकृत्पिंडप्रपातनमित्यादिवचोप्याद्यस्यावश्यकत्वार्थं।
नतुद्वितीयादेर्निवारणार्थं।परिसंख्यापत्तेः।तत्रापिप्रथमयात्रायांयेषांप्रेतत्वनिवृत्त्यर्थंप्रेतशिलायांपिंडदानंमांड
स्फोटनंवाकृतंतेषांद्वितीययात्रायांनकार्यं।तदनंतरमृतानांतुकार्यमेव।इतरत्तुसर्वंसर्वेषांकार्यमितिशिष्टाचारः।अतो
स्मादमुक्तेपित्रादौनरकोद्धारस्वर्गब्रह्मलोकावाप्त्यादियथायथंफलं।मुक्तेतुपित्रादौप्रत्यवायाभावःसत्यांकामनायांपु
त्रादिवदृश्यमाणंकर्तृगतंफलंभवतीतिसिद्धं।।।इतिनारायणभट्टविरचितेत्रिस्थलीसेतौगयाफलादिविचारः॥ ॥अथ
सामान्यतोगयाप्रयोगः॥ [illegible]

Indira Gandhi National
Centre for the Arts

ता२

ग॰प्र ष्यति॥ गयायां धर्मपृष्ठे च सद[illegible]
॥५॥ ।दृष्ट्वेति पितॄंश्चार्च्य वंश्यान् विंशतिमुद्धरेत्॥ वामनपुराणे प्रेतराजः कंचिद्वणिजं प्रत्याह॥ गयायां तीर्थजुष्टायां प्रान्त्राशी
वसमन्वितः॥ मम नामसमुद्दिश्य पिंडनिर्वपणं कुरु॥ तत्र पिंडप्रदानेन प्रेतभावादहं सखे॥ मुक्तः स्यां सर्वदा त्वं गयास्या
मि शुभलोकतां इत्येवमुक्त्वा वणिजं प्रेतराजोनुगैः सह॥ स्वनामानि यथान्यायं सम्यगाख्यातवान् एहः॥ उपाजयिद्वा
प्रययौ गयाशिरमनुत्तमं॥ पिंडनिर्वपणं तत्र प्रेतानामनुपूर्वशः॥ चकार च स्वदायादान् पितॄंश्चक्रे च नंतरं॥ आत्मनश्च
महाबुद्धिर्महाबोधौ तिलैर्विना॥ पिंडनिर्वपणं चक्रे तथान्यान् पिगोत्रजान्॥ एवं दत्तेषु पिंडेषु वणिजा प्रेतभावतः विमु
क्तास्ते द्विजाः प्राप्य ब्रह्मलोकं च ते गताः॥ एवं च गयाशिरसि पिंडदानस्य प्रेतत्वविमुक्तिब्रह्मलोकावाप्ती फलमिति॥ तीर्थया ॥५॥
तत्रैव पद्मादतीर्थयात्रायां॥ गयायां गोपतिं द्रष्टुं स जगाम महासुरः॥ सरसि ब्रह्मणः स्नात्वा कृत्वा चैव प्रदक्षिणं॥ पिंडनिर्व

पणं पुण्यं पितॄणां स च कारह महात्मा रते॥ आंगिरसतीर्थयात्रायां॥ मुंडपृष्ठे गयायां च नैरृते देवपर्वते॥ तृतीयांकौ वप
द्यां च ब्रह्महत्या विमुच्यते॥ तथा बलभद्रतीर्थयात्रायां॥ गयस्य यजमानस्य गयस्येव महाक्रतुः॥ आरूता सरितां श्रेष्ठा गय
यज्ञे सरस्वती॥ विशाला नु गयेष्टा ऋषयः शंसितव्रताः॥ गयस्येवेति गययज्ञस्य तेनैवोपमानमतिप्रशंसार्थ॥ तथा पुल
स्त्यतीर्थयात्रायां॥ ततो गयां समासाद्य ब्रह्मचारी जितेंद्रियः॥ अश्वमेधमवाप्नोति गमनादेव भारत॥ तत्राक्षयवटो नाम त्रि
षु लोकेषु विश्रुतः॥ यत्र दत्तं पितृभ्यस्तु भवत्यक्षयमित्युत॥ महानद्यामुपस्पृश्य तर्पयेत् पितृदेवताः॥ अक्षयान्प्राप्नुया
ल्लोकान् कुलं चैव समुद्धरेत्॥ ततो ब्रह्मसरो गच्छेद् ब्रह्मारण्योपशोभितं॥ ब्रह्मलोकमवाप्नोति प्रभातामेव शर्वरी॥ ब्रह्म
ण्णा तत्र सरसि यूपः पुण्यः प्रकल्पितः॥ यूपं प्रदक्षिणं कृत्वा वाजपेयफलं लभेत्॥ ततो गच्छेत राजेंद्र धेनुकं लोकविश्रु
तं॥ एकरात्रोषितो यत्र प्रयच्छेत्तिलधेनुकां॥ सर्वपापविशुद्धात्मा सोमलोकं व्रजेद्ध्रुवं॥ तत्र चिह्नं महाराज अद्यापि सु

Indira Gandhi National Centre for the Arts

ग·प्र· महाद्भुतं। कपिला सवत्सा वै पर्वते विचरत्युपि सवत्साया: पदानि स्म दृश्यंते द्यापि तत्र वै। तेषूपस्पृश्य राजेंद्र पदेषु
॥ ॥ नृपसत्तम। यत्किंचिदशुभं कर्म तत्प्रणश्यति भारत। ततो गृध्रवटं गच्छेत्स्थानं देवस्य धीमतः। स्नायीत तत्र भस्मना तत्राभि
गम्य वृषध्वजं। ब्राह्मणेन भवेच्चीर्णं व्रतं द्वादशवार्षिकं। इतरेषां तु वर्णानां सर्वपापं प्रणश्यति। उद्यंतं च ततो गच्छेत्पर्वतं
गीतनादितं। सावित्र्यास्तु पदं तत्र दृश्यते भरतर्षभ। तत्र संध्यामुपासीत ब्राह्मणः शंसितव्रतः। उपासिता भवेत्संध्या तु
न द्वादशवार्षिकी। योनिद्वारं च तत्रैव विद्यते भरतर्षभ। तत्राभिगम्य मुच्येत पुरुषो योनिसंकटात्। कृष्णशुक्लावुभौ पक्षौ
गयायां यो वसेन्नृप। पुनात्यासप्तमं चैव कुलं नास्त्यत्र संशयः। एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत्। यजेत वाश्वमेधेन
नीलं वा वृषमुत्सृजेत्। ततः फल्गुं व्रजेद्राजंस्तीर्थसेवी नराधिप। अश्वमेधमवाप्नोति सिद्धिं च परमां लभेत्। ततो गच्छे ॥८॥
द्राजेंद्र धर्मपृष्ठं महाफलं। यत्र धर्मो महाराज नित्यमास्ते युधिष्ठिर। तत्र कूपोदकं पीत्वा तेन स्नातः शुचिस्तथा। पित्

न्देवांश्च संतर्प्य मुक्तपापो दिवं व्र[...]जेत्। मतंगस्याश्रमं तत्र महर्षेर्भावितात्मनः। तं प्रविश्याश्रमं श्रीमच्छ्रमशोकविनाशनं।
गवामयस्य यज्ञस्य फलं प्राप्नोति मानवः। धर्मं तत्राभिसंस्पृश्य वाजिमेधफलं लभेत्। ततो गच्छेत राजेंद्र ब्रह्मण[...]स्तीर्थमुत्तमं
। तत्राभिपूज्य राजेंद्र ब्रह्माणं भरतर्षभ। राजसूयाश्वमेधाभ्यां फलं प्राप्नोति मानवः। तथा लोमशतीर्थयात्रायां। ततो मही
धरं गच्छेद्धर्मज्ञेनाभिरक्षितं राजर्षिणा पुण्यकृता गयेनानुपमद्युते। नगो गयशिरो यत्र पुण्या चैव महानदी। ऋषिजु
ष्टं महापुण्यं तीर्थं ब्रह्मसरोत्तुलं। अगस्त्यो भगवान्यत्र गतो वैवस्वतं प्रति। उवास च स्वयं यत्र धर्मराजः सनातनः। सर्वासां
सरितां यत्र समुद्भेदो विशांपते। यत्र संनिहितो नित्यं महादेवः पिनाकधृक्। तत्र ते पांडवा वीराश्चातुर्मास्यैस्तदेजिरे ऋ
षियज्ञेन महता यत्राक्षयवटो महान्। अक्षयो देवयजने अक्षयं यत्र वै फलं। ते तु तत्रोपवासांश्च चक्रुर्नियतमानसाः। चा
तुर्मास्येनायजंत आर्षेण विधिना तदेति। तथा धौम्यस्तीर्थयात्रायां। पूर्वं प्राचीं दिशं राजन्राजर्षि[...]गणसेवितां। रम्यां

Indira Gandhi National Centre for the Arts

ग॰प्र॰ तेकीर्त्तयिष्यामियुधिष्ठिरयथामति।यस्यांगिरिवरःपुण्योदेवराजर्षिसेवितः।शिवंब्रह्मसरोयत्रसेवितंत्रिदशर्षिभिः।
॥७॥ यस्तस्मिन्पुरुषव्याघ्रकीर्त्तयंतिपुरातनाः।एष्टव्याबहवःपुत्रायद्येकोपिगयांव्रजेत्।उत्तारयतिसंतत्यादशपूर्वान्दशापरा
न्।महानदीचतत्रैवतथागयशिरोनृप।यत्रासौकीर्त्यतेविप्रैरक्षय्यकरणोवटः।यत्रदत्तंपितृभ्योन्नमक्षय्यंभवतिप्रभो
।साचपुण्यजलायत्रफल्गुनामामहानदी।बहुमूलफलाचापिकौशिकीभरतर्षभ।पाद्मेसृष्टिखंडे।कीकटेषुगयापु
ण्यापुण्यंराजगृहंवनं।च्यवनस्याश्रमःपुण्योनदीपुण्यापुनःपुना।यत्रगाथाविचरतिब्रह्मणापरिकीर्त्तिता।एष्टव्याइ
त्यादि।तथा।किमस्माकंकुलेकश्चिद्गयांयास्यतियःसुतः।प्रीणयिष्यतितान्गत्वासपूर्वांस्तथापरान्।मातामहानाम
प्येवंश्रुतिरेषासनातनी।गंगायांवाष्ठिनिवर्यंमघासुप्रयतियःसुतः।तिलैःसन्नाष्टभिर्वापिदास्यतेवजलांजलिं।अरण्य ७॥
नितयेवापिपिंडदानंकरिष्यति।प्रथमंपुष्करारण्येनैमिषेतदनंतरं।धर्मारण्यंपुनःप्राप्यश्राद्धेनत्वाप्रदास्यति।गयायां

म॰
धर्मपृष्ठेवेत्यादि।व्रजनायनरोऽत्रअघ्रातंपरिसर्पति।नरकस्थान्पितॄन्सद्यःस्वर्गंनयतिसत्वरः।कुलेतस्यनराधमःप्रेतोनभवतिकश्चनापि
तत्रमोक्षपदवीपिंडदाना गच्छति।एकोमुनिःकुंभकुशाग्रहस्तआम्रेषुमध्येसलिलंददाति ।आम्राश्चाभिसिक्ताःपित
रश्चतृप्ताएकाक्रियाह्यर्थकरीप्रसिद्धा।गयायांपिंडदानात्तुनान्यद्दानंप्रशस्यते।एकेनपिंडदानेनतृप्तायेमोक्षगामिनः।इत्यादिदा
नंप्रवरंवदंतिबंधुप्रदानंचतथामुनींद्राः।गयासुतीर्थेषुनरैःप्रदत्तंतद्धर्महेतुप्रवरंप्रदिष्टं।वायुपुराणेसनत्कुमारउवाच।
वक्ष्येतीर्थवरंपुण्यंश्राद्धादौसर्वतारकं।गयातीर्थंसर्वदेशतीर्थेभ्योप्यधिकंशृणु।इत्युपक्रम्य।गयानाम्नागयाख्याताक्षे
त्रंब्रह्मादिकोद्भितं।कांक्षंतिपितरःपुत्रान्नरकाद्भयभीरवः।गयांयास्यतियःपुत्रःसनस्त्राताभविष्यति।गयाप्राप्तंसुतंदृष्ट्वा
पितॄणामुत्सवोभवेत्।पद्भ्यामपिजलंस्पृष्ट्वाअस्मभ्यंकिंन्नदास्यति।गयांगत्वान्नदातायःपितरस्तेनपुत्रिणः।तथा।ब्रह्म
ज्ञानंगयाश्राद्धंगोग्रहेमरणंतथा।वासःपुंसांकुरुक्षेत्रेमुक्तिरेषाचतुर्विधा।ब्रह्मज्ञानेन [illegible] किंसाध्यंगोग्रहे

Indira Gandhi Na...

मरणेन किं। किं कुरुक्षेत्रदानेन यदि पुत्रो गयां व्रजेत्तथा। गयापिंडप्रदानेन यत्फलं लभते नरः। न तच्छक्यं मया वक्तुं
ग॰त्र कल्पकोटिशतैरपि। इत्यादि। एतान्येव वचनान्यग्निपुराणेपि क्रमान्यूनत्वेन ज्ञेयानि। भारते दानधर्मेषु। एष्टव्या बहवः पुत्रा
८॥ यद्येकोपि गयां व्रजेत्। यत्रासौ प्रथितो लोके अक्षय्यकरणो वटः॥ गारुडे ब्रह्मवचः। सारात्सारतरं व्यास गयामाहात्म्यमुत्तमं।
प्रवक्ष्यामि समासेन भुक्तिमुक्तिप्रदं शृणु। गयासुरोऽभवत्पूर्वं वीर्यवान्परमः स च। तपोऽतप्यन्महाघोरं सर्वभूतोपतापनं
। ततः संतापिता देवास्तद्वधार्थं हरिं गताः। शरणं हरिरूचे तान्भवितव्यं शिवात्मभिः। पातितेस्य महादेहे तथेत्यूचुः सुरा हरिं
कदाचिच्छिवपूजार्थं क्षीराब्धेः कमलानि च। आनीय कीकटे देशे शयनं चाकरोद्वने। विष्णुमायाविमूढोसौ गदया विष्णुना हत ८
:। अतो गदाधरो विष्णुर्गयायां मुक्तिदः स्थितः। तस्य देहे लिंगरूपी स्थितः स्वयं पितामहः। विष्णुराहाथ मर्यादां पुण्यं क्षेत्रं भ
विष्यति। तत्र श्राद्धं पिंडदानं स्नानादि कुरुते नरः। स स्वर्गं ब्रह्मलोकं च गच्छेन्न नरकं पुनः। गयातीर्थं परं ज्ञात्वा यागं चक्रे पिता

महः। ब्राह्मणान्पूजयामास ऋत्विक्त्वं समुपागतान्। नदीं रसवतीं दृष्ट्वा स्थितां वाप्यादि शं ततः। भक्ष्यभोज्यफलानां च कामधे
न्नुं तथासृजत्। पंचक्रोशं गयातीर्थं ब्राह्मणेभ्यो ददौ प्रभुः। धर्मयागे तु लोभाद्धि प्रतिगृह्य धनादिकं स्थिता विप्रास्तदा श
प्ता गयायां ब्रह्मणा ततः। मा भूत्त्रिपुरुषी विद्या मा भूत्त्रिपुरुषं धनं। युष्माकं स्याद्वारिवहा नदी पाषाणपर्वताः। शप्तैस्तैः प्रार्थि
तो ब्रह्मानुग्रहं कृतवान्प्रभुः। लोकाः पुण्या गयायां ये श्राद्धिनो ब्रह्मलोकगाः। युष्मान्ये च पूजयिष्यंति तैरहं पूजितः सदा
। ब्रह्मज्ञानं गयाश्राद्धं गोग्रहे मरणं तथा। वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्विधा। समुद्राः सरितः सर्वे वापीकूपह्रदानि च।
ह्मानुकामा गयातीर्थं व्यासप्रोक्ति न संशयः। ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः। पा[illegible]मं सर्वं गयाश्राद्धाद्विनश्य
ति। यस्य गयाश्राद्धं कृतं तस्य ब्रह्महत्यादिपंचमहापातकनाशः फलमित्यर्थः। असंस्कृता मृता ये च पशुचोरहताश्च ये
सर्पदष्टा गयाश्राद्धान्मुक्ताः स्वर्गं व्रजंति ते। एतदपि श्राद्धोद्देश्यफलमेव। गयायां पिंडदानेन यत्फलं लभते नरः। न तच्छ

Indira Gandhi National Centre

कथंमयावक्तुंकल्पकोटिशतैरपि। एतत्तु श्राद्धकर्तृगतं फलमिति कश्चित्। गयापिंडदानस्य स्तुतिरियमित्यन्ये। वायुपुराणे। श
ग.प्र. मीपत्रप्रमाणेन पिंडं दद्यादक्षयाशिरे। उद्धरेत्सप्त गोत्राणि कुलमेकोत्तरं शतं। सप्तगोत्राणि तु। पिता माता च भार्या च भगिनी दुहि
१७ ता तथा। पितृमातृष्वसा चैव सप्तगोत्राणि विदुरिति। अत्र मा  तृगोत्रं मातामहगोत्रं। भार्यागोत्रं श्वशुरगोत्रं भगिनीदु
हितृपितृष्वसृमातृष्वसॄणां गोत्राणि यत्कुले ता दत्ताः संदीयंति। एतेषामेव गोत्राणामेकोत्तरंशतं कुलं। लक्षयीणा २४
तत्स्थाः पुरुषाः। ते यथा। तत्वानि विंशति नृपा द्वादशैकादशा दश। अष्टौ विंतिवगोत्राणां कुलमेकोत्तरंशमिति। पितृगोत्रे
तत्वानि २४। एते च द्वादश परे। तावंत एवावरे। मातृगोत्रे दश परे दशैवावरे इत्येवं विंशतिः। भार्यागोत्रेष्टौ परेष्टावरे इत्ये
वं। नृपाः षोडश। भारते षोडशराजकीयतथोक्तेः। भगिनीगोत्रे षट्परे षडवरे एवं द्वादश। दुहितृकुले पंच परे पंच वदौहि १७
त्रादयो वरे जामाता चेत्येकादश। पितृष्वसृकुले तु श्वशुराद्याः परे पंच। तदूर्ध्वाद्याश्च वरे पंचेत्येवं दश। मातृष्वसृकुलेत

श्वशुराद्याश्चत्वारः परे तदूर्ध्वाद्याश्चत्वारो वरे इत्येवं अष्टौ सर्वे समुदिता एकोत्तरं शतं भवंति। वायवीये। गयासुरस्य शि
रसि पुण्ये प्रेतादिवर्जिते। स्थिता ब्रह्मादयो देवा गतः सो पि पवित्रतां। कीकटेषु गया पुण्येत्यादि पूर्ववत्। अन्यत्रापि॥
जीवतो वाक्यकरणात् प्रत्यब्दं भूरिभोजनात्। गयायां पिंडदानाच्च त्रिभिः पुत्रस्य पुत्रता। कौर्मे। गया प्राप्यानुषंगेण यदि श्राद्धं स
२४ माचरेत्। तारिताः पितरस्तेन स याति परमां गतिं। भविष्योत्तरे श्रवणद्वादशीव्रतप्रसंगे कंचिद्वणिजं प्रति प्रेतवचनं। हिमवंतमथा
साद्य तत्र त्वं लप्स्यसे निधिं। गयाशीर्षं ततो गत्वा सर्वेषां श्राद्धमाचर। तथेत्युक्त्वा ततो गत्वा निधिं प्राप्य गयां ययौ। प्रेतानां क्रमशस्तत्र
चक्रे श्राद्धं दिने दिने। यस्य श्राद्धं करोति स्म यस्मिन्यस्मिन् दिने वणिक्। स स तस्य तदा स्वप्ने दर्शयत्यात्मनस्तनुं। अब्रवीति च महाभाग
प्रसादेन तवानघ। प्रेतभावो मया त्यक्तः प्राप्तोस्मि परमां गतिमिति। व्यासः। गयां गत्वानुपः कश्चित्पितॄन्संतर्पयेन्नरः। दश पूर्वा
न्परान्विंशानात्मानं च पुनाति सः। स्थानं देहपरित्यागो गयायां तु विधीयते। श्राद्धं पिंडप्रदानं च गयायां तु विशिष्यते। वायुपु

Indira Gandhi National

ग.प्र
॥१०

राणि। आनंत्याय सवेद्दत्तं ...मांसं पितृक्षये। ...लोह आनंत्याय ...कल्पते पितृक्षये गया। तथा गयायां धर्मपृ-
ष्ठे च सदसि ब्रह्मणस्तथा। गयाग्रवटे चैव श्राद्धं दत्तं महाफलं। भरतस्याश्रमे पुण्ये नित्यं पुण्यतमैर्वृतं। मतंगस्य पदं तत्र दृश्यते सर्व-
मानुषैः। स्थापितं धर्मसर्वस्वं लोकस्यास्य निदर्शनं। ...कवनं पुण्यं पुण्यकृत्तिनिषेवितं। यस्मिन् पांडुविशाल्येति तीर्थं सज्योति-
दर्शनं। तृतीयायां तथा पादे ...गया ...मंडले। महाह्रदे कौशिक्यां दत्तं श्राद्धं महाफलं। मुंडपृष्ठे पदं ... ब्रह्मर्षिगणसेवितं
। तत्र स्नात्वा दिवं यांति स्वशरीरेण मानवाः। दत्तं चापि सदा श्राद्धमक्षयं समुदाहृतं। स्नात्वा ऋणत्रयं तत्र निःक्षिणोति नरोत्तमः। मा-
नसे सरसि स्नात्वा श्राद्धं निर्वर्त्तयेत्ततः। उत्तरं मानसं गत्वा सिद्धिं प्राप्नोत्यनुत्तमां। तस्मिन्निर्वर्त्तयेच्छ्राद्धं यथाशक्ति यथाबलं। का-
मान्स लभते दिव्यान्मोक्षोपायां ... कौर्मे। गयातीर्थं परं गुह्यं पितृणां चातिवल्लभं। कृत्वा पिंडप्रदानं तु न भूयो जायते १०
नरः। सकृद्गयाभिगमनं कृत्वा पिंडं ददाति यः। पितरस्तारितास्तेन यास्यंति परमां गतिं। गयाक्षिप्रगमनं कर्त्तुं यः शक्तो नाभिगच्छति।

शोचंति पितरस्तं वै वृथा तस्य परिश्रमः।। गायंति पितरो गीतानुकीर्त्तयंति महर्षयः। गयां यास्यति यः कश्चित्सोस्मान्संतारयि-
ष्यति। यदि स्यात्पातकोपेतः स्वधर्मपरिवर्जितः। गयां यास्यति वंशे यः सोस्मान्संतारयिष्यति। एष्टव्या बहवः पुत्राः शीलवंतो
गुणान्विताः। तेषां तु समवेतानां यद्येकोपि गयां व्रजेत्। तस्मात्सर्वप्रयत्नेन ब्राह्मणस्तु विशेषतः। प्रदद्याद्विधिवत्पिंडान् गयां ग- मि४
त्वा समाहितः। धन्यास्तु खलु ते मर्त्या गयायां पिंडदायिनः। कुलान्युभयतः सप्त समुद्धृत्याप्नुयात्परं। मात्स्ये। पितृतीर्थं गया(
...या नाम सर्वतीर्थवरं शुभं। यत्रास्ते देवदेवेशः स्वयमेव पितामहः। तत्रैषा पितृभिर्गीता गाथा भागमभीप्सुभिः। एष्टव्या बहवः
वः पुत्रा यद्येकोपि गयां व्रजेत्। यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्। विष्णुः। अपि जायेत सोस्माकं कुले कश्चिन्नरोत्तमः
। गयाशीर्षवटे श्राद्धं यो नः कुर्यात्समाहितः। यमः। एष्टव्या बहवः पुत्राः शीलवंतो गुणान्विताः। तेषां वै समवेतानां यद्येकोपि
गयां व्रजेत्। यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्। वशिष्ठः। नंदंति पितरस्तस्य सुवृष्टैरिव कर्षकाः। यद्गयास्थो ददात्यन्नं

Indira Gandhi National Centre for the Arts

प्र॰गा॰ ११ पितरस्तेन पुत्रिणः ॥ मात्स्ये गौरीस्थानप्रतिपादनं प्रक्रम्य वाराणस्यां विशालाक्षी प्रयागे ललिता तथा ॥ गयायां मंगला नाम
मक्षततशौ वेत्तु सैहिका ॥ याज्ञवल्क्यः ॥ यद्ददाति गयास्थश्च सर्वमानंत्यमश्नुते ॥ नरसिंहपुराणे ॥ शिवनद्यां शिवकरं गयायां तद्वनार्द्द
नं ॥ सर्वत्र परमात्मानं पः पश्यति समुच्यते ॥ शिवनदी विहारनगरेस्ति ॥ वाराहपुराणे ॥ सनत्कुमार उवाच ॥ धन्यस्त्वमेव द्विजमुख्य
वर्य यद्दैवादाश्चिरतं पितॄंश्च ॥ श्रीणासि मंत्रव्रतजाप्यहोमैर्गयां समासाद्य तथान्नपिंडैः ॥ शृणुष्व वा कश्च नृपतिर्बभूव विशालनामा
सपुरीं विशालां ॥ उवास धन्यां इति मानपुत्रः ॥ स्वयं विशालाधिपतिर्द्विजाग्र्यान् ॥ पप्रच्छ पुत्रार्थममित्रहंता तत ब्राह्मणाश्चोचु
र्द्दीनसखाः ॥ राजन्पितॄन्संतर्पय पुत्रहेतोर्दत्वा गयायां विधिवत्तु पिंडान्नूनं च वै सुतस्तेस्तु ॥ द्विजाव वीरसहस्रदाता सकलक्षि
तीशः ॥ इतीरितं ब्राह्मणैः स प्रहृष्टो राजा विशालाधिपतिः प्रयत्नात् ॥ समागतस्तीर्थवरं द्विजेश गयामिमां तत्र कृतमानसः स राम ११
नू ॥ आगत्य सोथ प्रवरं सुतार्थी गयाशिरो यागपरः पितॄणां ॥ पिंडप्रदानं विधिना प्रयच्छेत्तावद्दियन्सुत्तममूर्त्तियुक्तान् ॥

पश्यन्सपुंसश्च सितरक्तकृष्णांस्तानुवाच राजा ॥ किमिदं भवद्भिः ॥ समुद्यतं शंस तत्सर्वमेव कुतूहलं मे मनसि प्रवृत्तं ॥ सितउ
वाच ॥ अहं सितस्ते जनकोस्मि तात नाम्ना च वृत्तेन च कर्मणा च ॥ अयं च मे जनको रक्तवर्णो नृशंसकृद्ब्रह्महा पापकारी ॥ अ
घेश्वरः श्वाव परः पितास्य कृष्णो नाम्ना कर्मणा वर्णतश्च ॥ एतेन कृष्णेन हताः पुरा वै जद [illegible] न्यानेकान्नृषयः पुराणाः ॥ एतौ
मृतौ द्वावपि पुत्र घोरं इमं वै विसंज्ञं नरकं प्रपन्नौ ॥ अत्र घोरे भूरीयं जनकः परोस्य कृष्णः पिता द्वावपि दीर्घकालं ॥ अहं च शुद्ध न
निजेन कर्मणा शक्रासनं प्राप्य सुदुर्लभं ततः ॥ त्वया पुनर्मंत्रविदा गयायां पिंडप्रदानेन बलादिमौ च मोक्षायितौ तीर्थ
वरप्रसादाद्वा विसंज्ञं नरकं गतौ तौ ॥ पितॄन्पितामहांश्चैव तथैव च प्रपितामहान् ॥ प्रीणयामीति यत्तोयं त्वया दत्तमरि
दम ॥ तेनास्मद्युगपद्योगजातो वाक्येन सत्तम ॥ तीर्थप्रभावात्क्षणात्मपितृलोकं न संशयः ॥ तत्र पिंडप्रदानेन एतौ तावपि
तामहौ ॥ दुर्गतावपि संसिद्धौ पापाद्धिक्कृतलिंगकौ ॥ तीर्थप्रभावः एषोत्र ब्रह्मघ्नस्यापि सत्तम ॥ पितुः पिंडप्रदानेन कुर्या

Indira Gandhi National Centre for the Arts

ग॰५ दुद्धरणांसुतः। एतस्मात्कारणात्सुत अहमेतो विगृह्य च। आगतोस्मि भवंतं वै द्रष्टुं यास्यामि सांप्रतं। एतस्मात्कारणाद्दैत्यप्र
वानूधन्योमयोच्यते। सकृद्गयाभिगमनं सकृत्पिंडप्रपातनं। दुर्लभं किं पुनर्नित्यमस्मिन्नेव व्यवस्थितः। किमत्र वोच्यते
रेभ्यतव पुण्यमितिप्रश्नो। येन स्वयं गदापाणिर्दृष्टो नारायणः स्वयं। यतो गदाधरः साक्षादस्मिंस्तीर्थे व्यवस्थितः। अतो हि
विख्यात तमं तीर्थमेतद्द्विजोत्तम। एतदनंतरं गदाधरस्तोत्रं रैभ्योक्तं तत्र त एवावगंतव्यं। पितृन्पितामहांश्चेति तथा
च ऋग्वेदी अमुकगोत्रममुकशर्माणं पितरं स्वधानमस्तर्पयामीति प्रयुज्य माध्यंदिनस्तु अमुकगोत्रो स्मत्पिताम
कशर्मा तृप्यतामिदं तिलोदकं तस्मै स्वधेति प्रयुज्यानंतरं पितृन्प्रीणयामीति प्रयुंजीत। आगांतन्नामंते निवेशइति।
न्यायात्। एवं पितामहप्रपितामहयोरपि। एवं शाखांतरेपि। कश्चित्तु पितृन्नित्यादि वहुवचनं मूलेऽविवक्षितमिति १२
संप्रदायस्थ। तत श्च पितरं प्रीणयामीत्येवमाद्येकवचनं प्रयोज्यमित्याह। तन्न। पितरः शुंधंतामित्यादिवदेकस्मिन्नपु
२२

यद्देकं५
परवमंत्रन्यायेन वहुवचनोपपत्तेः। मंत्रस्वरूपस्य पाठगम्यतादन्यथाभावे मंत्रत्वव्याघातादविवक्षाकारणाभावाच्च
ति। मातामहादावपि वहुवचनं प्रयोज्यं न त्वेकवचनमूहितव्यं। प्रकृतावसमवेतार्थस्य विकृतावूहाभावात्। अदितिं पा
शानिति वत्। अत्र वाराहात्लोचनयामया श्राद्धात्पितुर्हारः कर्तुः पुत्रप्राप्तिश्च प्रतीयते। तत्रेदं विचार्यते किं गयाश्राद्धस्योभ
यं फलत्वेन प्रयोजकमुतैकं तदापि किमिति। तत्राविशेषादुभयं प्रयोजकमतः सकृत्प्रयोगादुभयं सिध्यतीति केचित्। त
न्नायोगसिद्धिन्यायविरोधात्। वक्ष्यमाणप्रकारेणपितृद्धारस्योद्धारत्वाच्च। अतस्तीर्थप्रभाव एषोत्रेत्युपसंहारश्लोकमालोच्य
पितृद्धारस्यैव फलता। पुत्रोत्पत्तिस्तु श्रूयमाणापि वाजिनवत्पदग्रहणवत्सकावाकगता गुराधाशासनवच्चानुनिष्पादि
न्यतो न प्रयोजिके परे भेनिरा तदपि मंदं। पुत्रार्थं पुत्रहेतोः सुतस्सेभविता सुतार्थी त्येवमभ्यासा सुतात्स्वेर्वमुख्यफलता श्र
वणात्। तत्प्रकरणे श्रूयमाणस्यापि पितृद्धारस्योद्धारत्वकल्पनात्। तथा च श्रूयते। उद्दतायेमया श्राद्धे ब्रह्मलोके उ तेप्यु
स्य २

Indira Gandhi ... Centre ...

प्र॰ग॰ न्ने। भुंजते कृत्यैः पापावान् तेषां जायते क्व चित् न वा पि पतनं तस्मात्तस्य नाद्भवति भूमिपा। वंशोच्छेदात् पुनः सर्वे वितरंति महीतले।
१३ तले। आगात्या स्मात्तता लोकान्निपत्य जग्मतीतल्ले पापाः पापां समायांतियो विंश्रेष्ठाः श्रुत्वा वित्ता मिति। नच यदपि चुद्धा
रस्य हारता तर्हि पुत्रकामना भावे केवल लोद्धारार्थं आह मनुष्ठीयेते तिवाच्यं वाराहेद्धारत्वेनापि श्रुतस्यापि चुद्धारस्य पुरा
णांतरेषु फलत्वेन श्रवणात्तस्यापि च तत्र प्रयोजकतोपपत्तेः। संयोगपृथक्त्वन्यायाच्च प्रयोगभेदेनैकस्यापि प्रयोजकत्व
द्धारत्वेन विरुध्यते। यथाग्निहोत्रहोमस्यापि इंद्रियकामप्रयोगे साधनभूतदधिप्रयोजकता। इंद्रियकामप्रयोगेवद
ध्वं इंद्रिये साध्यमाने हारतेति। तस्मादुभयं फलं प्रयोजकं च। किंतु योगसिद्धिन्यायेनैकस्मादपि श्राद्धप्रयोगादेकमेवज्ञा
यते। तत्र यदा पुत्रार्थिना क्रियते तदा तदापि रेव फलं उद्धारस्त्वद्धारो। यदा तु पितृसद्गतिकामेण त्वनुष्ठीयते तदा तद १३
व मुख्यं फलमिति सर्वमकलंकं।। ननु तथापि नानायोनिगतानां पितॄणामुद्धारो न फलं तया वक्तुं शक्यते। नाना

यातिजननकर्मणो फलस्यारब्धत्वात्तस्य प्रारब्धकर्मत्वात्। प्रारब्धकर्मणा मनामुक्तं क्षीयते कर्मेत्येवमादिना भोगादेव क्षय
प्रतिपादनात्। अथ स्नेगादेव तस्मिन्नष्टे उद्धारो भवति। तर्हि गयाश्राद्धमपार्थकं। तर्हि नापि प्रतिबंधापगमेष्वयमेव तस्य
वादितिचेत्। उच्यते वचनवशात् कर्मविपाकदानादिनेव गयाश्राद्धेन प्रारब्धमपि नाश्यते। किमिव वचनं न कुर्यादिति न्याय
त्। ततश्च नाभुक्तं क्षीयते कर्मेति स्मृतिर्वाचनिकवलवत्प्रतिबंधकाभावे सत्येव प्रारब्धकर्मणां भोगात् क्षयं प्रतिपाद
यतीत्यविरोधः।। ।।इति श्रीमद्भट्टरामेश्वरसूरिसूनुना नारायणभट्टविरचिते त्रिस्थलीसेतौ गयाप्रकरणे सामान्यतो गया
यात्राप्रशंसा।। ।।छ।। ।।राम।। अथ गयोत्पत्तिर्गयाप्राशस्त्यनिमित्तं च वायुपुराणमूलकमुच्यते। स पद्म शतयोजनो
च्छ्रायः षष्टियोजनविस्तारोऽतिबलो वायासुरः कोलाहलसंज्ञके गिरौ दारुणं तपस्तेपे। तत्तपसा तापिता देवा ब्रह्मलोकं
गत्वा तमूचुः। वयं गयतपसातिपीडितास्तत्र शरणं भवेति। तान्ब्रह्मोवाच। वं शिवं शरणं व्रजामहे इति। ततस्तत्र गतान्

ग·मा·
॥१४॥

ब्रह्मादीनूचुः शंभुरूचे विष्णुं शरणं यास्याम इति। ततः सर्वे क्षीराब्धिं गत्वा विष्णुं तुष्टुवुः। ततः कष्टेन प्रत्यक्षीभूतेन विष्णुना
किमर्थं भवद्भिरागमनमिति पृष्टे तैर्भयकारणं निवेदितं सर्वे भवंतस्तत्र गच्छंतु मयापि तत्रागम्यते इत्युक्त्वा गरुडारूढो ब्र
ह्मादिसहितो विष्णुर्वरदानं गत्वा किमर्थं त्वया तपः क्रियत इति पृष्टवान् सर्वेभ्यः पवित्रेभ्यस्तीर्थादिभ्यो मे शरीरमतिपवित्रमस्त्वि
ति गयासुरेण वरे याचिते तथा भविष्यतीत्युक्त्वा स देवो विष्णुर्दिवं गतः। तस्य देहं दृष्ट्वाऽतिपवित्रतया केचिद्दर्शनेनान्ये स्प
र्शनेन ब्रह्मलोकं गता लोकाः। ततो निरधिकारा यमाद्यो ब्रह्माणं गत्वा स्वाधिकारत्यागमयोचंत। ततो ब्रह्मणोक्तं। वि
ष्णुनासौ दत्तवरो विष्णुं व्रजाम इति ततो विष्णुं गत्वा त्वया दत्तवरोऽसावतः सर्वे ब्रह्मलोकं व्रजंत्यतो नोपायं कुरु विष्णुरुक्तो विष्णु १४
र्ब्रह्माणमाह। यज्ञार्थं तद्देहः प्रार्थ्यतामिति। ततो ब्रह्मा गत्वा तथाकरोत्। ब्रह्मोवाच। पृथिव्यां यानि तीर्थानि दृष्टानि
भ्रमता मया। यज्ञार्थं तु न तेतानि पवित्राणि शरीरतः। त्वया देहः पवित्रस्त्वं प्राप्तं विष्णुप्रसादतः। अतः पवित्रं देहं स्वं यज्ञा

र्थं देहि मे सुर। ततो गयासुर उवाच। धन्योऽहं। यद्भवान् सकलस्रष्टापि यागार्थं मद्देहं याचते। अवश्यं दत्तं इत्युक्त्वा सोप
तत् भूमौ श्वेतकल्पे गयासुरः। नैर्ऋती दिशमाश्रित्य तदा कोलाहले गिरौ। शिरः कृत्वोत्तरे देशे पादौ कृत्वा तु दक्षिणे। त
तो ब्रह्मा संभृतसंभारस्तस्य शरीरे यागं कृत्वा पप्रमाह। एतच्छिरसि निश्चलतार्थं शिला धार्यते। ततो यमेन तथा कृ
तेपि स शिलोऽसुरश्चचाल तद्दृष्ट्वा ब्रह्मा देवान् रुद्रशिवादीनाह। भवंतः शिलायां निश्चलास्तिष्ठंत्विति। तेषु स्थितेष्वपि चचाले
वमः। ततो ब्रह्मा विष्णुं गत्वा सर्वमूचे तस्माद्धि सो निश्चलतार्थं त्वं प्रसादं कुर्विति। ततो विष्णुः स्वमूर्तिं दत्तवान् ब्रह्मणा त
स्यां शिलातले स्थापिता यावल्लिन एवासुरः। ततो ब्रह्मादिप्रार्थितो हरिः स्वयमेव शिलायां जनार्दन पुंडरीकाक्ष गदाध
ररूपैः स्थितः प्रपितामह पितामह पितामह फल्वीशकेदारैः पंचरूपैर्ब्रह्मा। गजरूपी विघ्ननाशकः। गयादित्यो नगर्व
दक्षिणार्को स्त्रिधा रविः। लक्ष्मीः सीताभिधानेन गौरी च मंगला ह्वया। गायत्री चैव सावित्री त्रिसंध्या च सरस्वती। आद्य

Indira Gandhi National
Centre for the Arts

ग·प्र
२५ यागदयाभीतो यस्माद्दैत्यः स्थिरीकृतः स्थित इत्येव हरिणा तस्मादादिगदाधरः॥ ततो हे देवाः विष्णुवचसा किमहं स्थिरो न संस्थं
किमर्थमहं वंचित इति गयेनोक्ते देवैर्वरं ब्रूहीत्युक्तो गयासुरस्तु वाच॥ यावत्पृथ्वी पर्वताश्च यावच्चंद्रार्कतारकाः॥ तावच्छिलायां
तिष्ठंतु अत्र ब्रह्मविष्णुमहेश्वराः॥ अन्ये च सकला देवा मन्नाम्ना क्षेत्रमस्तु च पंचक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः॥ तन्मध्ये
सर्वतीर्थानि त्रैलोक्ये संति यानि वै॥ गंगाद्याः सुमहानद्यो वनानि च सरांसि च॥ ते देवास्तानि तीर्थानि प्रयच्छंतु हितं नृणां
॥ स्नानादितर्पणं कृत्वा पिंडदाने फलाधिकं॥ पितॄणां ब्रह्मलोकश्च भुक्तिमुक्तिफले तथा॥ एको विष्णुस्त्रिधा मूर्त्तिर्यावत्संकी
र्त्यंते तु धैः॥ तावद्गयासुरक्षेत्रे स्या तिष्ठंतु सदा भुवि॥ ब्रह्महत्यादिकं पापं व्यपोहंतु च सेविनां॥ एवं गयासुरेण वरेषु प्रा
र्थितेषु तथास्त्विति प्रोक्ते देवैस्ततो ब्रह्मा ब्राह्मणेभ्यो ग्रामान् गृहकामधेनुकल्पवृक्षक्षीरकुल्यादधिकुल्यामधुकु २५
ल्या घृतकुल्यान्नपर्वतादीन् सर्वोपस्करान् दत्वा नान्यो भवद्भिर्याचितव्य इत्युक्त्वा ब्रह्मलोकं जगाम॥ ततस्ते ब्राह्मणा लोभे

वि२

नपुनर्धर्मयाजयित्वा तं प्रतियांच्यां कृतवंतस्ततो ब्रह्मा समागत्य तान्नु शशाप॥ कृतवंतो यतो लोभं मद्दत्तेह्य विलेपिवा॥ तस्माद्दत्तं म
वयुष्माकं भविष्यति सदा द्विजाः॥ विद्यावर्जिता यूयं गृहा मृन्मयाः अन्नपर्वताः पाषाणमयाः क्षीरकुल्याद्या वारिवहा इत्यादि न वि
ति२ ष्यती शप्तास्ते ब्राह्मणा ऊचुः॥ ब्रह्मंस्त्वया यद्दत्तं तत्सर्वं शापान्नष्टमतो नो जीविकार्थं प्रसादं कुर्विति॥ तच्छ्रुत्वा देवाः स्थितो ब्रह्मोवाच ६४
तीर्थोपजीविका यूयमाचंद्रार्कं भविष्यथ॥ ये युष्मान् पूजयिष्यंति गयायामागता नराः॥ हव्यकव्यैर्धनैः श्राद्धैस्तेषां कुलशतं व्रजे
ता नरकात्स्वर्गलोकाय स्वर्गलोकात्परां गतिमिति॥ ॥ अत्र अथ गयशिरसि स्थापिता याः शिला या उपाख्यानं वायव्ये पुराणे॥ ध
र्मस्य धर्मव्रताख्या कन्यासीत्॥ सा धर्मवत्सा चानुरूपवरार्थं तपश्चरंती ब्रह्मणो मानसेन सुतेन मरीचिना दृष्टा पृष्टा च कुल
नामादि॥ तया च कुलादौ निवेदिते अहं ब्रह्मणा गार्हस्थ्यं कर्तुमागतास्मि॥ त्वं च कुलशीलादिभिर्मेनुरूपा तस्मान्मम भार्या भ
वेति मरीचिनोक्ते अहं धर्मसुता परतंत्रा ततः पितरमेव प्रार्थयेति तयोक्ते धर्मं प्रति तां ययाचे मरीचिः॥ ततो धर्मस्तां विधिना तस्मै ददौ॥

ल२

Indira Gandhi National
Centre for the Arts

म० ततःकदाचिन्मरीचिःफलपुष्पादिवनादाहृत्यश्रांतस्तामूचेशयानस्यमेत्वयापादसंवाहनंकार्यमि[illegible]तुकाश्यपितः।
साचपादसंवाहनंचकार।तावद्ब्रह्मातत्रागतः।साचश्वशुरंदृष्ट्वातूष्णींतयानिद्रितस्यभर्तुःपादसंवाहनंपरित्यज्यब्रह्माणमर्घ्या
१६ दिभिरपूजयत्।तदंतरेमरीचिरुत्थितस्तामपश्यन्क्रुद्धःशशाप।।यस्मान्ममसेवांत्यक्त्वान्यत्रत्वंगतातस्माच्छिलाभवेति।त
तःसादारुणंतपश्चचार[illegible]।ततस्तत्तपसासंतप्तादेवाहरिंशरणंगताः ततोविष्ण्वादयःसमागत्यवरंवरयस्वेतितांप्रोचुः।सा
तुमह्यंमरीचिनादत्तःशापोमाभूदितिवव्रे।ततस्तेमहर्षिशापोनान्यथाकर्तुंशक्यतइत्युक्तेपुनःसावव्रे।शिलाहंतुभविष्या
मिब्रह्मादेःपावनीशुभा।नदीनदादितीर्थेभ्योदेवादिभ्योतिपावनी।तिष्ठंतुदेवाःसकलादेव्यश्चमुनयःस्थिराः।ब्रह्माविष्णु
श्चरुद्रश्चाप्यर्पयित्वापदंमयि।पंचाग्नयःकुमाराद्याःवसुरूपेणसंस्थिताः।मूर्तामूर्तस्वरूपेणपदरूपेणदेवताः।मांदृष्ट्वा। १६
सर्वलोकस्यमहापातकनाशिनी।पूतःकृत्वाधिकारीवैश्राद्ध[illegible]कृद्ब्रह्मलोकभाक्।शिलास्थितेषुतीर्थेषुस्नात्वाकृत्वाय

तर्पणंश्राद्धंसपिंडकंयेषांब्रह्मलोकंप्रयांतुते।स्थास्यंतिचमरिष्यंतियेतुब्रह्मपुरीजनाः।वाराणसीप्रयागंचपुरुषोत्तमसंज्ञकं।गं
गासागरसंज्ञंचनित्यंतिष्ठंतुफल्गुनि।मुक्तिर्भवेन्मृतानांचपितृणांश्राद्धतःसदा।जरायुजांडजावापिदेहंत्यक्त्वाशिलोपरि।गच्छं
तुविष्णुसायुज्यंकुलैःसप्तशतैःसह।सर्वदेवस्वरूपातुनाम्नेयंदेवरूपिणी।यावत्स्थास्यतिब्रह्मांडंतावत्स्थास्यतिवैशिला।देवरू
पावचःश्रुत्वादेवाऊचुःपतिव्रते।त्वयायत्प्रार्थितंसर्वमस्मद्वाक्याद्भविष्यति।गयासुरस्यशिरसि[illegible]यदास्थिता।त
दापदादिरूपेणस्थास्यामस्त्वयिसुस्थिराः।वरंदत्त्वाशिलायैवैतत्रैवांतर्दधुःसुराः।ततःसाक्रोशमात्रमिताशिलाभूत्सदेवव
रप्रदानात्तुसर्वजनास्तद्दर्शनस्पर्शनादिभिःस्वर्गमगमन्।ततोयमोब्रह्माणमाह।शिलामहिम्नासर्वेपुण्यकृतोजनामदधिका
रंस्वामिन्गृहाणेति।ततोब्रह्मणास्वगृहेतांधारयेत्युक्तोयमस्तांधारितवान्।सेयंशिलायमशिरसिधर्मेणनिश्चलतायैस्थापिता
गयासुरशिलांयोगेहयमेधमजोकरोत्।भागार्थमागतान्दृष्ट्वाविष्ण्वादीनब्रवीच्छिला।शिलास्थिताःप्रतिज्ञांतांकुर्वंतुपिष्ट

Indira Gandhi National Centre for the Arts

ग॰ध॰
१७

मुक्तये।तथैसुरत्का शिलायांतेदेवा विष्ण्वादयंस्थिताः।शिलारूपेणमूर्त्याख्यपदरूपेणदेवताः।व्यक्ताव्यक्तस्वरूपेणस्थिताःपूर्वप्रति
ज्ञपादैत्यस्यमुंडपृष्ठेतु शिलायस्माद्वसंस्थिता।तस्मात्समुंडपृष्ठाद्दिःपितृणांब्रह्मलोकदइति॥ ॥अथगदालोलोपाख्यानं॥ ॥
ब्रह्मणोदत्तवरोगदोनामासुरस्तस्यास्थीनिब्रह्मायाचितानिविश्वकर्मणागदामकारयत।एतस्मिन्नेवकालेब्रह्मपुत्रोहेतिनामासु
रस्तपोतप्यत।ब्रह्मादीन्तपसातुष्टान्वरंवव्रे।विष्णुमहेशेंद्राद्यायुधैरहमवध्यःस्यामिति।तेस्तथास्त्वितिवरेदत्तेइंद्रादीन्दूरीकृ
त्यस्वयमेवेंद्रत्वाद्यकरोत।हरिंतेशरणंजग्मुरूचुर्हेतिंजहीतितान्।ऊचेहरिरवध्योयंहेतिर्देवासुरैःसुराः।ब्रह्माद्यैर्मेप्रय
छध्वंहेतिहत्योहियेनतं।इतिविष्णुनोक्तेगदासुरास्थिघटितांगदांदेवाहरयेददुः।तयागदयाहेतेरसुरस्यशिरोनिर्भिद्यप
क्षालनार्थंगदायत्रलोलितातत्रगदालोलतीर्थमभूदिति॥ ॥अथगदाधरमहिमा॥ ॥अग्निपुराणे।स्थितेगदाधरोदेवोव्य
क्ताव्यक्तोभयात्मकः।निश्चलार्थंस्वयंदेवःस्थितआदिगदाधरः।गदाधरनामनिरुक्तिश्चवायवीये।आद्ययागदयानीतोय

स्माद्दैत्यःस्थिरीकृतः।स्थितइत्येषहरिणातस्मादादिगदाधरः।हरिणायतःस्थिरीकृतःस्तस्माद्धरिर्गदाधरइत्यन्वयः।तथागदया
प्रागवष्टभ्यगयासुरशरीरके।निश्चलार्थंस्थिरायस्मात्तस्मादादिगदाधरः।तथा।शिलापर्वतफल्ग्वादिरूपेणव्यक्तआस्थि
तः।गदाधरादिरूपेणाव्यक्तआदिगदाधरः।शिलापादादिरूपेणाव्यक्ताव्यक्तात्मनास्थितः।तथावायवीयेदृश्यंतिसदात्तस्यादेवमादिगदा
धरं।तेषांभूपतिधनंधान्यमायुरारोग्यमेवचकलत्रपुत्रपौत्रादिगुणकीर्तिसुखादिकं।अहन्याहन्यसेयंतनित्यंविष्णुपुरेवसेत्।गंधदा
नेनगंधाढ्यःसौभाग्यंपुष्पदानतः।धूपदानेनराज्यंपिंडदीपादीप्तिर्भविष्यति।ध्वजदानात्पापहानिर्यात्राकृद्ब्रह्मलोकभाक्॥ग
दाधरस्तोत्रंवायवीये।शिवउवाच।अव्यक्तरूपोयोदेवोमुंडपृष्ठादिरूपतः।फल्गुतीर्थादिरूपेणनमाम्यादिगदाधरं।व्यक्ता
व्यक्तस्वरूपेणपदरूपेणसंस्थितः।हृर्निलिंगादिरूपेणनमाम्यादिगदाधरं॥शिलायांदेवरूपिण्यांस्थितोब्रह्मादिभिःसुरैः।पूजि
तसंस्कृतंदेवंनमाम्यादिः।महादेवस्यजगतोव्यक्तस्यैकहिकारणं।अव्यक्तंज्ञानरूपंतंनमा॥यंचदृष्ट्वातथास्पृष्ट्वापूजयित्वाप्र

णस्थव। श्राद्धादौ ब्रह्मलोकाप्तिर्नमाम्यादिगदाः देहेंद्रियमनोबुद्धिप्राणाहंकारवर्जितं। जाग्रत्स्वप्नविनिर्मुक्तं सत्यमानंदमद्वयं
तुरीयं ज्योतिरात्मानं नमाम्यहं॥ ॥सनत्कुमार उवाच॥ ॥एवं स्तुतो महेशेन प्रीतो ह्यादिगदाधरः। स्थितो देवः शिलायां सब्रह्मा
द्यैर्देवैः सहासंस्थितं मुंडपृष्ठाद्रौ देवमादिगदाधरं। ये वंदंति पूजयंतीह विष्णुलोकं प्रयांति ते। धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी प्र
प्नुयाद्धनं। कामानवाप्नुयात्कामी मोक्षार्थी मोक्षमाप्नुयात्। वंध्या च लभते पुत्रानभ्यर्च्यादिगदाधरं। राजा विजयमाप्नोति शू
द्रः सुखमवाप्नुयात्। पुत्रार्थी लभते पुत्रान्वेदवेदांगपारगान्। मनसा प्रार्थितं सर्वं पूजाद्यैः प्राप्नुयान्नरः॥ ॥अथ पदमहिमा
॥॥ वायवीये विष्णोः पदं रुद्रपदं ब्रह्मणः पदमुत्तमं। काश्यपस्य पदं दिव्यं द्वौ हस्तौ यत्र निर्गतौ। पंचाग्नीनां पदान्यत्र इंद्रागस्त्यप १८
दे परा रवेश्च कार्तिकेयस्य क्रौंचमातंगयोस्तथा। मुखलिंगानि सर्वाणि पदानीति निबोधतेति। अन्यान्यपि चंद्रगणेशरवादीनां पदा
नि पदश्राद्धप्रकरणे वक्ष्यंते। अत्र श्राद्धे क्रमं च तत्रैव वक्ष्यामः॥ अथ विशेषतः केषांचिन्महिमा॥ तत्र विष्णुपदस्य तावद्वायवी



ये भीष्मो विष्णुपदे श्रेष्ठेऽत्र आहूय तु पितॄन्स्वकान्। श्राद्धं कृत्वा विधानेन पिंडदानाय चोद्यतः। पितुर्विनिर्गतौ हस्तौ गयाशि
रसि द्यं तनोः भीष्मः पिंडं ददौ भूमौ नाधिकारः करे यतः। शंतनुः प्राह संतुष्टः शास्त्रार्थे निश्चलो भवान्। त्रिकालदृष्टिमेवत्तु
अंते विष्णुश्च ते गतिः। इच्छया मरणं चास्तु इत्युक्त्वा मुक्तिमागतः॥ ॥अथ रुद्रमहिमा॥ ॥रामो रुद्रपदे श्राद्धे पिंडदानाय चो
द्यतः। पिता दशरथः स्वर्गात्प्रसार्य करमागतः। तं नादात्पिंडं करे रामो ददौ रुद्रपदे ततः। शास्त्रार्थातिक्रमाद्भीतो रामं दशरथोऽब्रवी
त्। तारितोऽहं त्वया पुत्र रुद्रलोको ह्यभून्मम। पदे पिंडप्रदानेन हस्ते तु स्वर्गतिर्न हि। त्वं च राज्यं चिरं कृत्वा पालयित्वा द्विजान्प्रजाः।
यज्ञान्सदक्षिणान्कृत्वा विष्णुलोकं गमिष्यसि। सहायोध्याजनैः सर्वैः कृमिकीटादिभिः सह। इत्युक्त्वासौ दशरथो रुद्रलोकं य
यौ परं। अथ काश्यपपदस्य। काश्यपस्य पदे दिव्ये भारद्वाजो मुनिः पुरा। श्राद्धं कृत्वा गतो दातुं पित्रादिभ्यश्च पिंडकं। शुक्ल
कृष्णौ ततो हस्तौ पदमुद्भिद्य निर्गतौ। दृष्ट्वा हस्तद्वयं तत्र पितुः संशयमागतः। ततः स्वमातरं शांतां भारद्वाजस्तु पृष्टवान्क



Indira Gandhi National
Centre for the Arts

श्यपस्य पदे कस्मिन् शुक्ले कल्पे यथाकरोः। पिंडो देयो मया मातः ज्ञानासि पितरं वद। शांतो वाच। नारद्वाज मह्यं प्राग्ददे हि ह
स्ताय पिंडकं। भारद्वाजस्ततः पिंडं दातुं कस्माय बोधतः। श्वेतो दश्यो ब्रवीत् सुतं देहि मह्यं मम औरसः। कृष्णो ब्रवीत् क्षेत्रजस्त्वं ततो
मे देहि पिंडकं। शुक्लो ब्रवीत् त्वं वैरिणी यं यतो तस्मान्मम औरसः। वैरिणी वाह दीवा दीवी ज्ञिन्नेक्षेणे ततः। हस्तं प्रसार्य शिलायां वै पिं
डदानं वकारसः। हंसयुक्तेन यानेन ब्रह्मलोकमुभौ गतौ॥ ॥इति पदमहिमा॥ ॥अथ गयादिनामनिर्वचनं॥ वायवीये। श्वेत
कल्पे तु वाराहे गयो यागमकारयत्। गयनाम्ना गया ख्याता क्षेत्रं ब्रह्मादिकं   क्षितं। आग्नेयेपि। गयोपि चाकरोद्यागं वह्नन्नं
बहुदक्षिणं। गयापुरी तेन नाम्नेति। वायवीये। दैत्यस्य मुंडपृष्ठो द्वे शिलायस्मा च संस्थिता। तस्मात्स मुंडपृष्ठादि पितॄणां
ब्रह्मलोकदः। तथा। क्रौंचरूपेण हि मुनिर्मुंडपृष्ठे तपो करोत्। तस्य पादांकितो यस्मात् क्रौंचपाद मतः स्मृतः। तथा। हेत्यासु १८
रस्य च शीर्षं गदया तु द्विधाकृतं। ततः प्रक्षालिता यस्मिन् तीर्थे तस्य विमुक्तये। गदालोलमिति ख्यातं सर्वेषामुत्तमोत्तमं॥ ॥अ

थ गयायां काम्यकर्माणि॥ ॥स्मृतिरत्नावल्यां। अल्पेनाप्यत्र कालेन नरो धर्मपरायणः। पापादि मोचयत्याशु जीर्णां त्वचमिवोरगः॥ मय
।तीर्थानामुत्तमं तीर्थं गयायां त्रैलोक्यविश्रुता। दत्वा पिंडोदकं तत्र दृष्ट्वा व प्रपितामहं। अक्षयान्नलभते लोकान् कुलं चैव समुद्धरेत्। ग
यायामक्षयश्राद्धं जपहोमतपांसि च। पितृक्षयो हि तत्पुण्यं तस्मात्तत्राक्षयं भवेत्। क्षयो निवासस्थानं। क्षयो निवासे इति पाणि
निना निपातनात्। तथा। यः करोति वृषोत्सर्गं गयाक्षेत्रे ह्युत्तमे। अग्निष्टोमशतानां तु फलं लभते नात्र संशयः। वृषोत्सर्गः नील
ह्याह कर्मीतथा। यत्फलं सन्निहत्यायां राहुग्रस्ते दिवाकरे। फलं तदखिलं प्रोक्तं गयायां तु दिने दिने। गयां गतोन्नदाता यः पितरस्ते
न पुत्रिणः। यद्ददाति गयास्थश्च सर्वमानंत्यमश्नुते। इत्यादि। पाद्मे सृष्टिखंडे। धान्यप्रदानं प्रवरं वदंति वस्त्रप्रदानं च तथा मु
नींद्राः। गयासु तीर्थेषु नरैः प्रदत्तं तत्तन्महिन्नु प्रवरं प्रदिष्टं॥ ॥अथ गयादिप्रमाणं॥ ॥वायवीये। पंचक्रोशं गयाक्षेत्रं क्रोशमेकं
गयाशिरः। अत्रापि मध्यावधिप्रत्येव। मुंडपृष्ठाद्यत्पूर्वस्मिन्नुदक्षिणे पश्चिमोत्तरे। सार्धक्रोशद्वयमानं गयेति परिकीर्तितं। मुंडपृ

Indira Gandhi National Centre for the Arts

ग·प्र· २० घ्राद्रिर्मध्यावधिरित्यर्थः॥ अग्निपुराणे गयाशिरपरिमाणं। नागात्कूटात्तथा चोत्तरमानसात्। एतद्गया शिरः प्रोक्तं फल्गुतीर्थं तदुच्यते।
तावदेव फल्गुतीर्थमित्यर्थः। तथा। मुंडपृष्ठान्नगाधस्तात्फल्गुतीर्थमनुत्तमं। अत्रानुत्तममिति निर्देशाद्गयाशिरपरिमितस्यापि फ
ल्गुतीर्थस्य मुंडपृष्ठाधस्ततो भागो तिपवित्र इत्यर्थः। भारते। महानदी देवनद्योस्तु घतीर्थाद्युदंतरोदुदक्तानकनंदायाग यामध्ये ड
कीर्तिता। तथा महानद्याः पश्चिमेन यावद्गृध्रेश्वरो गिरिः। उत्तरे ब्रह्मयूपस्तु यावद्दक्षिणमानसं। एतद्गयाशिरो नाम त्रिषु लोकेषु वि
श्रुतं॥ ॥ अथ गयागमनप्रशंसा॥ ॥ वाय्वग्निपुराणयोः। गृहाच्चलितमात्रेण गयायां गमनं प्रति। स्वर्गारोहणसोपानं पितॄणां तु प
दे पदे। पदे पदे श्वमेधस्य यत्फलं गच्छतो गयां। तत्फलं च भवेन्नूणां समग्रं नात्र संशयः। स्मृतिरत्नावल्यां। विप्रघ्नस्य सुरापस्य बालघ्न
स्य गुरुद्रुहः। नाशमायाति वै पापं गयायां समनुयातियः। तथा। ततो गयां समाश्रित्य ब्रह्मचारी जितेंद्रियः। अश्वमेधमवाप्नोति गम
नादेव भारत। ब्रह्मचारी कृतोत्यत्र। वह्निपुराणे। यथा यथा ब्रजन्नूयाति जनः स्नानादह्यां प्रति। तथा तथा दिवं यांति प्रेताः पूर्वपितॄ



महाः। तथा। गयाश्राद्धविधानार्थं स्वकायः कीकटं व्रजेत्। पापीयानू जायते सद्यो भूतश्चेह्मृद्घ्नो भवेत्। तथा। दृष्टार्थं गमने दे
वे तीर्थाद्यर्थं न दुष्यति। न जातु देपूादोषोस्ति तीर्थं क्षेत्रे च देवते। गमने विधिरपि वायवीयाग्नेययोरुक्तः॥ उद्यतस्तु गयां गंतुं श्रा
द्धं कृत्वा विधानतः। विधाय कार्पटी वेषं ग्रामस्यापि प्रदक्षिणं। ततो ग्रामांतरं गत्वा श्राद्धशेषस्य भोजनं। कृत्वा प्रति दिनं गच्छेत्प्रतिग्र
हविवर्जितः। स्वगृहे घृतप्रधानद्रव्यं श्राद्धं न वदेवत्। पर्वत्य श्राद्धशेषघृतं गृहीत्वा ग्रामं प्रदक्षिणीकृत्य ग्रामांतरं गत्वा तत्र भुक्त्वा
तमपि प्रदक्षिणीकृत्य प्रतिग्रहादि विवर्जितो गच्छेदिति व्याख्यातं स्मृतिरत्नावल्यां। अन्येषु देवत्यमेतच्छ्राद्धमाहुः। गयाश्राद्धावि
लदेवताकमपरे। अत्यतसर्वगमन विधानं सामान्यविधितो वसेयं॥ ॥ अथ गयायां वासकाले यत्ना॥ ॥ तत्र वायव्याग्निपुराणयो
र्गयां प्रकम्य। पक्षत्रय निवासी च पुनात्यासप्तमं कुलमिति सार्द्धमासवास उक्तः। अत्र च प्रवेशदिनादारभ्य सार्द्धमानेन गणना
। भारते तु शुक्लकृष्णपक्षक्रमेण मुख्य चांद्रमानेन मासवास उक्तः। शुक्लः स्तोकं तु भो पक्षौ गयायां यो वसेन्नृप। पुनात्यासप्तमं चैव

Indira Gandhi National
Centre for the Arts

ग॰प्र
२१

कुलं तारयते संशय इति। कलस्तु ज्ञाविति पाठे गौणत्वं द्वाश्रयणं। आमरणमपि गयायां वासो तिप्रशस्तः॥ तदुक्तं वायवीये। सकृद्गया
भिगमनं सकृत्पिंडप्रपातनं। दुर्लभं किं पुनर्नित्यमस्यामेव व्यवस्थितिः। प्रमादान्म्रियते केनेत्र स्यादेमुक्तिदायकं वक्ष्यज्ञानाद्यथा तु
क्ति ब्रह्मज्ञानान्मत्र संशयः। कीकटादिमृतानां च पितॄणां मुक्तिदायिका। तस्मात्सर्वप्रयत्नेन वस्तव्यं सविचक्षणैः॥ सर्वेषां शरीरं मान
गयायां ब्रह्म णो दितं। स्मृतिरत्नावल्यां। स्नानं देहपरित्यागो गयायां तु विधीयते। श्राद्धं पिंडोदकं चैव गयायां पारिकीर्तितं। स्ना
न मवस्थानं। ब्रह्मवेदवर्त्मे। गयाशीर्षवसेन्नित्यं स्नानं फल्गुवीसमाचरेत्। गयाशीर्षवपेत्पिंडमेतत्सर्वं पि दुर्लभमिति॥ ॥ अथ ग
या श्राद्धाधिकारिणः॥ ॥ तत्र पुत्रादयो धिकारिणः षड्घट्कादेवज्ञेयाः। विशेषस्तूच्यते। पुत्रेषु विद्यमानेषु नान्यं वै कारयेत्
स्वधामित्यस्यात्रापवादः। स्मृतिरत्नावल्यां। आत्मजो वान्यजो वापि गयाकूपे यदा तदा। यन्नाम्ना पातयेत्पिंडं तं नयेद्ब्रह्म शाश्वतं २१
तथा। सवर्णा ज्ञातयो मित्रा बांधवाः सुहृदस्तथा। तेपि भूयो गयाकूपे पिंडं दद्युर्विधानतः। अत्र गयामात्रोपलक्षणं कूपग्रहणं।

देषधर्मः सनातनस्तस्यापि गयायामपवादस्तत्रैवायुक्तः। स्मोपि पिता दद्यात्कनिष्ठेभ्योपि पूर्वजः पत्न्यै चापि पतिर्दद्यात्
न पुत्रेभ्यः पिता दद्यान्नानुजस्य तथाग्रजः। न पत्न्यै तु पतिर्दद्यात् बुद्धिमान्सुसमाहितः। ते पियंतीति दिदं सर्वे पिंडे दत्त इति स्मृतिः। अत्र तस्मै
भ्यो पि यत्नेन दद्यात्पिंडं प्रयत्नतः॥ तेपीति। अपि शब्दा क्रा द्ध कर्तुरपि यो र्गो भवतीत्यर्थः। बोधायनः। पित्रा श्राद्धं न कर्तव्यं सर्वेषां
तु कदाचन। भ्रात्रा नैव तु कर्तव्यं भ्रातॄणां तु कनीयसां। अतिस्नेहेन कुर्यात्तांस पिंडीकरणं विना। गयायां तु विशेषेण ज्यायानपि
समाचरेत्। सत्यासिनास्तु गयां गतेषु तेषु श्राद्धस्थलेषु पितृस्मरणपूर्वकं दंडस्पर्शनमात्रं कार्यं न तु श्राद्धतर्पणादि। तदुक्तं
वायवीये। दंडं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिंडदः। दंडं स्पृष्ट्वा विष्णुपदे पितृभिः सह मुच्यते। स्पृष्टत्यन्तर्विताणिजर्थं तेन स्प
र्शयित्वेत्यर्थः। तथा। गयायां मुंडपृष्ठे च कूपे यूपे वटे तथा। दंडं प्रदर्श्य भिक्षुः पितृभिः सह मुच्यते। जीवत्पितृकस्य प्रसंगतो ग
यां गत्वा मातृपार्वणं कुर्यात्। आवश्यकं गयाप्राप्तौ सत्यां यत्रम्नते हनि। मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवतीति मेत्राय
णीयपरिशिष्टात्। अत्र प्राप्तौ सत्यामित्यनेन प्रासंगिकी प्राप्तिरुक्ता तेनाद्दिश्य गत्वा मातृश्राद्धं न कार्यं तदुक्तं। गयां प्रसंग

य२

Indira Gandhi National
Centre for the Arts

ग॰प्र॰ २२ तो गत्वा मातृश्राद्धं समाचरेत् इति। प्रासंगिकप्रश्नो मृतमातृको ऽमृतमातृको वा जीवत्पितृकस्तीर्थं तत्र जीवत्पितृ नाये भ्यो दद्यात्ते
भ्यो गयायां दद्यादिति केचित्। वहवस्तु नेत्याहुरित्यादि सर्वं प्रघट्टके एव विस्तरतो निरूपितं। यच्च यदीयधनग्राही सोपि त
दुद्देश्यके गयाश्राद्धे ऽधिकारी। अत एव प्रेतधनभाजो वणिजो गयाश्राद्धं दर्शितं वायवीये। प्रेतः कश्चिद्धि मृत्यार्थं वणिजं कंचि
दब्रवीत्। मम नाम्ना गयाशीर्षे पिंडनिर्वपणं कुरु। प्रेतभावाद्विमुक्तिः स्याद्गृहाणेदं धनं मम। तच्छ्रुत्वेदमादाय वणिक्स्व
गृहमागतः। धनं निक्षिप्य तत्रासौ किंचिदादाय निर्ययौ। आदौ गत्वा गयाशीर्षे प्रेतराजस्य पिंडकं। स तदा वंधुभिः सार्द्धं स्व
पितृभ्यस्ततो ददौ। प्रेतः प्रेतत्वाद्विनिर्मुक्तो वणिक् स्वगृहमागत इति। वह्निपुराणे। पुत्रो वा बंधुभृत्यो वा मित्रो वा स्वजनोपि
वा। ऋणिको वाथ वा दद्याद्द्वयोः स्वर्गस्तदा तयोः। एवमन्योप्यधिकारिणः प्रघट्टके वगंतव्याः॥ ॥इति श्रीनारायणभट्टकृ २२
तौ त्रिस्थलीसेतौ गयाप्रकरणे गयाश्राद्धाधिकारिणः॥ ॥अथ गयाश्राद्धे विशेषधर्माः। हेमाद्रिनिबंधे॥ महालये ग

पिष्ट३

याश्राद्धे प्रेतश्राद्धे दशाहिके। पिंडशब्दप्रयोगः स्यादन्नमध्यत्र कीर्तयेत्। अयं पिंडः स्वधानमः इत्यादि निगमे तु पिंडशब्दप्रयोगः। तथा
। वृद्धिश्राद्धे गयाश्राद्धे प्रीतिश्राद्धे तथैव च। सपिंडीकरणश्राद्धे नजपेत् पितृसूक्तकमित्यभिश्रवणजपनिषेधः। पिंडद्रव्याणि वायु
यवीये। पायसेनाथ चरुणा सक्तुना पिष्टकेन वा। तंडुलैः फलमूलाद्यैर्गयायां पिंडदो भवेत्। सक्तुर्यवपिष्टं कंदुतंडुलपिष्ट
। तंडुला अखंडा एव। पायसादीनां पूर्वपूर्वाभावे उत्तरोत्तरं। तथा। तिलाज्यमधुदध्यादि पिंडद्रव्येषु योजयेत्। अग्निपुराणे पा
सेयेनाज्ययुक्तेन सक्तुना चरुणाथ वा। पिंडदानं तु कर्तव्यं गोधूमैस्तिलमिश्रितैः। अन्यदपि पिण्याकतिलगुडादि द्रव्यं सामान्य
विधौ तीर्थश्राद्धप्रकरणे उक्तमिति नेहोच्यते। पिंडाष्टगातापि त्रेवोक्ता। पिंडप्रमाणं तु वायवीये। मुष्टिमात्रप्रमाणेन आर्द्रा
मलकमानतः। शमीपत्रप्रमाणं वा गयायां पिंडो विधीयते। अन्यान्यपि कपित्थादि प्रमाणानि प्रदद्यात्। इति यानि च शमीपत्र
प्रमाणेन पिंडं दद्याद्गयाशिर इत्यादीनि तानि अपि शब्दाध्याहारेणावश्यकतापराणि न तु परिमाणनियमार्थानि। उक्तं वा

लै४ तर प्रमाणानि नियमान्यविधावुक्तानि। एतेषां सर्वेषां राकम्पा... आदिविषयतया व्यवस्था। सर्वेष्वशक्तो

शमीपत्र २

Indira Gandhi National Centre for the Arts

स्मृ तेर मा नेम बेतथा मूर्ये कन्यायां कार्ये के घटे। गया श्राद्ध प्रशंसा ति त्रिषु लोके षु दुर्लभं

गा.प्र. कार्यविरोधात्। अथ गयाश्राद्धकालः॥ ॥तत्र वायवीये। गयायां सर्वकालेषु पिंडं दद्याद्विचक्षणः। अधिमासे जन्मदिने अस्ते च
२३ गुरुशुक्रयोः। न त्यक्तव्यं गयाश्राद्धं सिंहस्थे च बृहस्पतौ॥ अग्निपुराणे। गयाश्राद्धं प्रकुर्वीत संक्रांत्यादौ विशेषतः। काले वापरपक्षे
वा चतुर्थ्यादितिथिष्वपि संपद्येत वा यदहर्हरिति। अपरपक्ष इति। सकलापरपक्षे चतुर्थ्यादौ वेत्यर्थः। स्मृतिरत्नावल्यां। मकरस्थे
र्नमा तेनु ग्रहणे चंद्रसूर्ययोः। दुर्लभं त्रिषु लोकेषु गयायां पिंडपातनं। गारुडे। तीर्थश्राद्धं गयाश्राद्धं श्राद्धमन्यच्च पैतृकं। अब्द
मध्ये न कुर्वीत महागुरुविपत्तिषु। अयं निषेधः सपिंडीकरणाभावे सति। तदुक्तं तत्रैव। अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपाक्षि
कं। अब्दमध्ये न कुर्वीत सपिंडीकरणं विनेति। अन्यत्रापि। अस्थिक्षेपो गयाश्राद्धं तथैवापरपाक्षिकं। प्रथमेब्देपि कुर्वीत कृते य
दे. स्माधैहिकां केचिच्चैवं पठंति। अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपाक्षिकं। प्रथमेब्दे न कुर्वीत कृते पितृसपिंडने। अस्यापवादः। अ २३
स्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपाक्षिकं। प्रथमेब्देपि कुर्वीत यदि स्याद्भक्तिमान्सुत इति। अब्दमध्येपि गयाश्राद्धादिषु देवताव

योःप्राप्ता सिद्धये देवतासंस्कारकं पार्वणश्राद्धं भक्तिसंज्ञकं तद्वान् भक्तिमान्। तत्कृत्वा गयाश्राद्धादि कुर्यादित्यर्थ इति कश्चित्। अन्ये
तु यथाश्रुतमाहुः। अन्ये यं व्यवस्था। अकृतसपिंडनस्य प्रथमेब्दे गयाश्राद्धं नैव कार्यं। कृतसपिंडनस्यापि सति संभवे नेति त्रिमु
ख्यः कल्पः। पुनरागमनासंभवे तु भक्त्या भक्तिश्राद्धं वा कृत्वा कुर्यात्। नित्यत्वादिति। भक्तिश्राद्धं च पशुपुरोडाशवत् देवतासंस्का
रकं तत्कर्तृसंस्कारद्वाराधिकारसिद्ध्यर्थं तेनादृष्टार्थं यदीयं गयाश्राद्धादि कर्तव्यमस्ति तद्देवत्यमेव पार्वणं कार्यं अधिकारसिद्ध्यर्थं चेत्तु
अदृष्टात्मात्रादेरपि गयाश्राद्धे कर्तव्ये पित्रादि पार्वणमेव प्रसक्तमिति विशेषा तु केरिति। अब्दमध्ये गयाश्राद्धकरणे वृद्ध्याप्तावि
वमासिकान्यपकृष्य कृत्वा गयाश्राद्धं कुर्यादिति केचित्। तन्न मूलवचो मृग्यं। महापातकिविषये विशेषो ब्रह्मपुराणे। क्रियते प
तितानां च गते संवत्सरे क्वचित्। देशधर्मप्रमाणत्वाद्गयाकूपे स्वबंधुभिः। कूपग्रहणं गयाशिरमात्रोपलक्षणं। अन्योपि विशे
षः। यो विवाहाद्यूर्ध्वं पिंडदाननिषेधः। कार्ष्णाजिनिः। विवाहव्रतचूडासु वर्षमर्धं तदर्द्धकं। पिंडदानं मृदा स्नानं न कुर्यात्तिलत

Indira Gandhi National Centre for the Arts

ह२ पि॰

गः प्र पर्णां स्मृतिसंग्रहे। विवाहोपनयादूर्ध्वं वर्षं वर्षार्धमेव वा न कुर्यात्पिंडनिर्वापं नंद्याकरकादि च। तथा हेमाद्रिमात्रे तथान्यत्र

२४ पिंडदाननिराक्रिया। कात्यायनादिस्मृत्युक्तेर्मासमेकं तु कर्मिणां। इत्यादि। अयं गयायां न प्रवर्त्तते। महालये गयाश्राद्धे मा

तापित्रोर्मृतेहनि। कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं सुत इति संग्रहवचनात्। तथा पित्रोः क्षयाहे गयायां च पितृयज्ञे महालये।

गयायां पिंडदानस्य न कदाचिन्निराक्रियेति वचनाच्च। अन्यः सर्वो विशेषः सामान्यविधित एवावसेयः। तिलतर्पणेपि विशेष

ः स्मृतिदर्पणे उक्तः। उपरागे व्यतीपाते गयायामथ पर्वणि। आदित्यादिनिषेधेपि कर्तव्यं तिलतर्पणं। तथा। पितृयज्ञे च गं यज्ञेषु॰

यायां च महालये। निषिद्धेपि दिने कुर्यात्तिलयुक्तं तु तर्पणं॥ ॥इति श्रीमन्नारायणभट्टविरचिते त्रिस्थलीसेतौ गयाप्रकर

२४ णे गयाश्राद्धे विशेषधर्माः॥ ॥अथ सामान्यप्रघट्टकोक्तोपि संप्रदाननिर्णयः किंचिद्विशेषाभिधित्सया पुनः क्रियते। तत्र

पूर्वोक्तिनानावचनैर्वायुपुराणस्कांदगयायां धर्मपृष्ठे नांदीमुखेष्टकाश्राद्धे गयायां च मृतेहनि पिता[illegible]सार्धं मातुः

नांदीमुखेष्टकाश्राद्धे गयायां च मृतेहनि पितामह्यादिभिः सार्धं मातुःश्राद्धं समाचरेत् या॰

[illegible] स्वेषूपक्रम्य पितृणां दत्तमक्षय्यमिति वचनात्पिंडं दद्यात्ततः पित्रादेरित्यादिवहुवचनात्स्वर्गं पि

त्रादित्रयाय श्राद्धं देयं। मातामहादिभ्योपि। पितरो यत्र पूज्यंते तत्र मातामहा अपि। अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेत् इति

गौतमोक्तेः॥ गयास्वुपक्रम्य मातामहानामप्येवं स्त्रीणां (?) भासनात्तन्नीति पाद्मसृष्टिखंडोक्तेश्च। मात्रादित्रयायापि देयं। अष्ट

ष्टकासु वृद्धौ च गयायां च मृतेहनि। अत्र मातुः पृथक् श्राद्धमन्यत्र पतिना सहेति वा भविष्यपुराणोक्तेः। [illegible] कै

अत्र केचित् पितृवर्गमातामहवर्गरूपतया षड्दैवत्यमेवेत्याहुः। अपरे तु मातृश्राद्धे पृथक्त्वविकल्पः। अत एवापरार्के। ग

या महालयादौ पृथक् सह वा भर्त्रेति सिद्धमिति। स्मृत्यर्थसारे तु अष्टकासु गयायां च पितृणां मातृणां च श्राद्धं पृथक्

कुर्यात् ससपत्नीकं। मातामहानां सपत्नीकमेवेति नवदैवत्यमेव नियतमुक्तं। हेमाद्रिस्मृतिरत्नावलीकारादिमते त्वेवमेव

। वृद्धास्तु मातामह्यादिवर्गायापि पृथग्देयमिति वदंति। अत एवाग्निपुराणे। पित्रादि नवदैवत्यं तथा द्वादशदैवतमिति। त

ग॰प्र॰ २५

थाशब्दो विकल्पे। शाट्यायनोप्येवं। अत्र सर्वत्र मूलवचनातिदेशाचारतश्च एवस्थेति सामान्यविधावेवोक्तं। पितृव्यादिभ्यो देय
मित्यपि तत्रैवोक्तं। किं बहुना नात्र संदेहः आदरः सर्वेभ्यो मित्रादिभ्यः स्मर्यमाणेभ्यो दद्यात्। यन्नाम्ना पातयेत्पिंडं तन्नयेद्ब्रह्म शाश्वत
इति सा॰ मान्यत उक्तेः। एवं श्राद्धं सपिंडानां पितृतीर्थेन वै तत इति वायवीयोक्तेश्च। मातुलपितृव्यादिपत्नीभ्योपि भर्तृपिंडादय
थगेव पिंडादि कार्यं। तदुक्तं वायवीये। स्वगोत्रे परगोत्रे वा दंपत्योः पिंडपातनं। अपृथक् द्विः फलं श्राद्धं पिंडं चोदकतर्पणं। अपृथ
कुसह॥ तथान्योपि विशेषः वायवीये॥ पिंडं दद्याच्च पित्रादेरात्मनोपि तिलैर्विना। तथा। आत्मनोपि परस्यापि गयाश्राद्धं यदा
तदा। यन्नाम्ना पातयेत्पिंडं तन्नयेद्ब्रह्म शाश्वतं। आग्नेये। पिंडो देयस्तु मित्रैर्वै स्वकीयकुलतारकैः। आत्मनश्च तथा देय अक्षय्यं च
गहे तवे। स्मृतिरत्नावल्यामपि पुराणवचः। आत्मनस्तु महाबुद्धिर्गयायां तु तिलैर्विना। पिंडनिर्वपणं कुर्यात्तथान्यत्रापि गोत्रजा २५
ः। अन्यथा इति च्छांदसं। अन्येपि गोत्रजा इत्यर्थ इति। तिलाभावः कुशाभावस्याप्युपलक्षकः। इदं चाद्यस्यात्मनो वा जीवतः पिंडदा

नं जनार्दन हस्त एव कार्यं। नतु गयातीर्थमात्रे। जनार्दनो भस्मकूटोस्य हस्ते तु पिंडदः। मंत्रेणानेनात्मनोन्येषां सव्येनापि तिलै
र्विना। जीवतां दधिसंमिश्रः सर्वे ते विष्णुलोकगाः। इत्यादिवायवीयादिवाक्यैः। एष पिंडो मया दत्तस्तव हस्ते जनार्दन इत्यादिवक्ष्यमा
णमंत्रलिंगेन च सामान्यवाक्यानां जनार्दनहस्तमात्रविषयत्वेनोपसंहारात्। आग्नेयवाक्येन चतुर्थांकरणवाक्यस्याग्नेयमा
त्रविषयत्वेन छागस्य वपाया मेदसोनुब्रूहीति प्रैषमंत्रलिंगेन वाग्नीषोमीयपशुवाक्यस्य छागमात्रविषयत्वेनोपसंहारवत्।
अग्निपुराणेतु स्वपिंडाद्ययोदेयाइत्युक्तं। त्रयः पिंडा मया दत्तास्तव हस्ते जनार्दन। परलोकगतस्याक्षय्यमुपतिष्ठतामितिमं
त्रलिंगात्। इदं च स्वस्य स्वकीयाधिकारित्वाभावनिश्चये। परस्यापि जीवतस्तदीयाधिकारित्वाभावनिश्चय एव कार्यं। नतु पु
त्रवता संभावितपुत्रेण वा। न च पुत्रवतो नवा संभावितपुत्रस्य जीवच्छ्राद्धसमानन्यायत्वादिति केचित्। तन्न मूलं तु संदेशा
चारवशाद्ग्राह्यं वस्तु। विशेषांतरं वह्निपुराणे। पापिनो ये दुराचाराः पतितास्तीर्थगाः स्वगाः। गयायां पिंडदानेन मुक्तिभाजो

Indira Gandhi National Centre for the Arts

भवंतीति। तथा। ब्रह्महा वृक्तत्वघ्नश्च गोघाती पंचपातकी। सर्वे ते निःकृतिं यांति गयायां पिंडपातनात्। पुराणांतरे ब्रह्महा।
वृक्तत्वघ्नश्च गोघाती मधुप स्तथा। स्तेयी गुर्वंगनागामी ये च बालगुरुद्रुहः। सर्वे त इति पूर्ववत्। किंच। पिण्याके सक्तु निर्वापि
गयाशीर्षे सकृन्नरः। यत्नाद्गतिः पूर्ववत्। गारुडे। असंस्कृता मृता ये च पशुचौरहताश्च ये। सर्पदष्टा गयाश्राद्धान्मुक्ताः स्वर्गं व्रजंति
ते। अत्र पितृव्यादीनामेकोद्दिष्टमेव न तु पार्वणं। तथा च हेमाद्रिणा बौधायनेन वचनमुदाहृतं। उपाध्यायगुरुश्वश्रूपितृव्याचार्य
मातुलाः। श्वशुरभ्रातृतत्सुतर्त्विक्प्रियपोषकाः। भगिनी स्वामि दुहितृ जामातृ भगिनीसुताः। पितरः पितृपत्नीनां पितुर्मातु
श्च याश्च साः। सखिद्रव्यद शिष्याश्च तीर्थे चैव महालये। एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नतः। पितृपत्नीनां पितरः सपत्नमा
तामहाः। अत्रायं क्रमो न विवक्षितः। किंत्वेकोद्दिष्टविधानमात्रं। उभयविवक्षायां वाक्यभेदापत्तेः। अतः सपद्यदेकोक्त एव ग्रा २८
ह्यः॥ ॥अथ गयास्थविप्रप्रशंसा॥ ॥वायवीये। ब्रह्मप्रकल्पितान् विप्रान् हव्यकव्यादिनार्चयेत्। तैस्तुष्टैस्तोषिताः सर्वाः

पितृभिः सह देवताः। आग्नेये ब्रह्मा येषु ब्राह्मणान् पूजयिष्यंति गयायां मामतां नराः। हव्यकव्यैर्धनैः श्राद्धे सप्तकुलशतं व्रजेत्। न
रकात् स्वर्गलोकाय स्वर्गलोकात् परां गतिं। एतेषां च श्राद्धीयब्राह्मणलक्षणसत्त्वेन नियमः सदभावे त्वनियमो गयाश्राद्धमात्रे तत्र
त एवाग्रे यद्गयाश्राद्धं प्रकुर्वीतेति प्रक्रम्य पूर्वेद्युश्च निमंत्रयेत्। यतीन् गृहस्थान् साधून् वा स्नातकान् श्रोत्रियान् द्विजान्। अनव
द्यान् कर्मनिष्ठान् शिष्टानुवाचारसंयुतान्। वर्जयेत् कुलीनांश्च शूद्रीयान्नान् निमंत्रितान्। इति सलक्षणविप्रादरो निषिद्धत्या
गश्चोक्तः। स्मृतिरत्नावल्यामपि यदि पुत्रो गयायां श्राद्धे कदाचित् कालपर्ययात्। तानेव भोजयेद्विप्रान् ब्रह्मणा वै प्रकल्पितान् इति
पौराणं वचनमुदाहृत्यात्रावधारणं तत्सुरः सनियमार्थं न त्वन्यनिवृत्त्यर्थं योग्यातिक्रमे दोषश्रवणादित्युक्तं। गयायां तु निर्गुणा
अपि तत्रत्या एव द्विजा भोज्या इति तु हेमाद्रिः। वयं तु। ब्रह्मप्रकल्पितान् विप्रान् भोजयेत् पूजयेद् यथेति अक्षयवटप्रकरणे पुन
ःश्रवणाच्चतुर्थीकरणोपसंहारन्यायेनाक्षयवटश्राद्ध एव नियमो न गयाश्राद्धमात्रे। एवं च शिष्टाचारोप्यनुसृत्यत इति॥ ॥ इ

Indira Gandhi National Centre for the Arts

ग॰प्र
२१

तिश्रीभट्टरामेश्वरसूरिसूनुनारायणभट्टविरचितेत्रिस्थलीसेतौगयाप्रकरणेगयाकार्यप्रयोगोद्यातः॥ ॥अथकार्यं॥तत्रगयायां
प्रवेशदिनकृत्यं॥वायुपुराणे।अश्वमेधमवाप्नोतिगमनादेवनान्यथेत्युक्तात्ततोगयाप्रदेशेतुप्रवर्त्तोस्मिमहानदी।तिफल्गुवाएव
नामधेयं।तोयंसमुत्पाद्येतिस्मृष्कनदीत्वाद्वालुकाखननेनतोयमुत्पाद्यातर्पणमितितीर्थप्राप्तिनिमित्तकश्राद्धस्याप्युपल
क्षणं।एवंफल्ग्वांश्राद्धादिकृत्वातस्मिन्नेवदिनेप्रेतशिलांगच्छेत्।तत्तीर्थप्रेतशिलादौचचरुणासद्यतेनवापितृभ्योदद्यात्तेभ्यश्च
मंत्रैःपिंडांस्तुनिर्वपेत्इतिवायवीयवचनात्सर्वदेशीयशिष्टाचारात्सामर्थ्याच्च।प्रेतशिलाश्राद्धफलंतुप्रेतत्वविमोकेनहि
पितृणांश्राद्धांतरोद्देशयोग्यताजायते।वायवीयेप्रेतशिलास्वरूपोक्तिपूर्वकंतत्रकर्तव्यमुक्तं।आक्रांतादितःशिलापादःप्रभासे
नाद्रिणाततः।भासितोभास्करेणेतिप्रभासःपरिकीर्तितः।प्रभासाद्रिंविनिर्भिद्यशिलांगुष्ठोविनिर्मितः।अंगुष्ठस्थितदेशोपि २०
प्रभासेशः।शिलांगुष्ठैकदेशोयःसाप्रेतशिलास्मृता।पिंडप्रदानात्तस्यानुप्रेतत्वान्मुच्यतेनरः।महानदीप्रभासाद्र्योःसंगमेस्ना

प्रकान्तिः १

नकृत्वानरःरामोदेव्यासहस्नातोरामतीर्थंततःस्मृतं।अर्थितोथमहानद्यारामस्नातोभवान्यदि।रामतीर्थंभवेत्तत्तत्सर्वलोकेषुपा
वनं।जन्मांतरशतैःसाग्रैर्यत्कृतंदुष्कृतंमया।तत्सर्वंविलयंयातुरामतीर्थाभिषेचनात्।मंत्रेणानेनयःस्नात्वाश्राद्धंकुर्वीतमानवः।राम
तीर्थेपिंडदस्तुविष्णुलोकंप्रयात्यसौ।तथेत्युक्त्वास्थितोरामःसीतयाभरताश्रमे।रामतीर्थेनरःस्नात्वामंत्रैःपिंडप्रदोभवेत्।प्रेतत्वात्तस्य
पितरोविमुक्ताःपितृतांययुः।रामरामहाबाहोदेवानामभयंकर।त्वांनमस्येहदेवेशममनश्यतुपातकं।नमस्कृत्यप्रभासेशंभास
मानःशिवंव्रजेत्।तंवशंभुंनमस्कृत्यकुर्याद्यामानलिततः।आपस्त्वमसिदेवेशज्योतिषांपतिरेवच।पापंनाशयदेवेशमनोवाक्
यकर्मजं।शिलायाअंघ्रितनंभूयःसमाक्रांतंनमेनतु।धर्मराजेनाद्रिरुक्तोनगच्छेत्तिनगःस्मृतः।यमराजधर्मराजौनिश्चलार्थं
व्यवस्थितौ।ताभ्यांदद्याद्गयाश्राद्धमपार्थकं।श्वानौद्वौश्यामशबलौवैवस्वतकुलोद्भवौ।ताभ्यांपिंडंप्रदास्यामिस्यातामेताव
हिंसकौ।आक्रांदितइत्यादिप्रभाससंज्ञेनाद्रिणाप्रेतशिलायाःपादआक्रांदितः।प्रसंगात्प्रसंज्ञानिनिमित्तकथनेभासि

२ बलिम भास १

व

ग·च तइति। शिलेति शिलां पुष्ठावयः प्रेतशिलातस्यां यस्य पिंडो दीयते स प्रेतत्वविमुक्तिलक्षणफलवान् भवतीत्यर्थः। महानद्दी
२८ ति। अत्र स्नानकर्त्तेरोपि प्रेतत्वान्मुच्यत इति अनुषंजनीयं। देव्यासीतया प्रार्थितइति। हे राम यदि भवान्स्नातस्तर्हि राममतीर्थे मे
तद्दक्षा। जन्मांतरेत्यादिमंत्रेण। वस्त्वात्वा यः श्राद्धं पिंडदानं च राम तीर्थे कुर्याद्दिसौ विष्णुलोके यात्वित्यंता नद्दीकृताप्रार्थना। सीत
येति सहार्थे तृतीया। मंत्रैरिति स्वस्वशाखोक्तैः रस्मत्कुले मृता ये चेत्यादिवक्ष्यमाणपौराणैः श्च प्रेतत्वादिति। प्रेतशिलाश्राद्धेन।
प्रेतत्वान्मुक्ताः पितरो राम तीर्थश्राद्धेन पितृनादेशा फवंतीत्यर्थः। यमुरिति यांतीत्यर्थः लकाराख्यात्पयः। राम राम इति। अनेन मंत्रेन
मंत्रलिंगवलाद्रामेन नमस्कृत्य प्रभासेशं च नमस्कृत्य शिवं शिवलोकं। तं वेक्षि। तं रामं। वः समुद्रेयात्तेन पुनरपि राम प्रभासेशौ न
मस्कार्यावित्यर्थ इति कश्चित्। वस्तुतस्तु प्रभासेश नमस्कारानुवादमात्रमेतद्यामं वलिविधानार्थं। दर्शपूंडाय विधानार्थमे २८
य पुनः श्रवणात्। आपइत्यादि वलिदानेमंत्रः। वलिश्च कुशतिलजलयुतेनान्नेन शिलायाइति। गयशिरसि स्थापिता।

याः शिलायाजघनप्रागोनगनाम्ना पर्वतेनाक्रांतः। तस्यैव नगस्य स्थिरतायै यमराजधर्मराजौ स्थापितावतः प्रेतशिलादक्षि
ण भाग स्थे गनाम्नि पर्वते गया श्राद्ध सार्थक्याय श्वानौ द्वावितिमंत्रेण यमराजधर्मराजयोर्वलिमेकमेव दद्यात्। धर्मराजेनेति प
से गान्न गनाम निरुक्तिः। अत्र वलिदानं नित्यं। वलेरदाने गया श्राद्धानर्थक्य श्रवणात्। इतरस्तु काम्य यथा कामिनं कुर्यादिति
।शेषं स्पष्टं। एतदंतं प्रथमेह्नि कृत्यं। इदं च प्रेतशिलादिषु सर्वेषु गयातीर्थेषु श्राद्धं प्रेतपर्वतश्राद्ध विहाति भूर्वात्स कलतदंग
युतं कार्यं। सर्वस्थानेषु चैवं स्यात्पिंडदाने तु नारद इति वायुपुराणे प्रेतपर्वत श्रा...द्धमुक्तं इति देशात्। यवतत्र तत्र विशेष वि
हिता धर्मास्तेपि भवंत्यामनहोमत्र्यायनो। अत्र प्रेतशिलायां प्रेतपर्वते वापित्रादिसकलपितृहणां प्रेतत्वविमुक्तिकाम नयात्र
त नजलपूर्णभांडस्फोटनमप्याचरंति शिष्टाः। तच्च तत्र तत्य सकलकृत्यानंतरं तथैव शिष्टाचारात्। गयायां च प्राप्तिदिनेतीं
र्थप्राप्तिनिमित्तको मुंडनोपवासोनकार्यो। मुंडनंचोपवासश्च सर्वतीर्थेष्वयं विधिः। वर्जयित्वाकुरुक्षेत्रं विशालं विरजां गयां

Indira Gandhi National
Centre for the Arts

ग.प्र मिति गयापर्युदासेन तस्य विधानात् । तत्रापि तीर्थप्राप्ति निमित्तसत्त्वमप्राप्तितीर्थप्राप्तिनिमित्तक एवोपवासे गयापर्युदासात्तत्प्रा
२९७ प्तिनिमित्तक एव सप्राप्तिदिने न कार्यः । एकादश्यादौ तु तीर्थप्राप्तौ तन्निमित्तकः कार्य एव । तस्य तीर्थप्राप्तिनिमित्तकत्वाभाव
त् । एवं पित्रादिमरणनिमित्तकमुंडनेपि ज्ञेयं ॥ ॥ इति त्रिस्थलीसेतौ गयायां प्रथमदिनकृत्यं ॥ ॥ अथ द्वितीयदिनकृत्यं
॥ तत्र वायुपुराणे । सर्वस्थानेषु चैवं स्यात्पिंडदानं तु नारदेति प्रेतपर्वतश्राद्धमुक्त्वा तद्धर्माणां वचनेनातिदेशात्सकलग
याधिकरणकतीर्थश्राद्धपद्धतिभूतं प्रेतपर्वतकृत्यं निरूप्यते । तत्र वायुपुराणे । अपरेद्युः शुचिर्भूत्वा गच्छेत्प्रेतपर्वतं ब्रह्म
कुंडे ततः स्नात्वा देवादींस्तर्पयेत्सुधीः । अपरेद्युर्गयाप्राप्त्युत्तरदिने प्रेतपर्वतो गयावायव्यदिशि गयातो गव्यूत्यधिकदूर
५ स्थः । ब्रह्मकुंडं प्रेतपर्वतमूले ईशानभागे । तत्र स्नानतर्पणे तदुपलक्षितश्राद्धानि कार्याणि । ततः पर्वतमारुह्य । कृत्वा २९
ध्यानेपितॄणां च प्रयतः प्रेतपर्वते । प्राचीनावीतिना भाव्यं दक्षिणाभिमुखः स्मरन् । कव्यवालोनलः सोमो यमश्चैवार्यमा

तथा । अग्निष्वात्ता बर्हिषदः सोमपाः पितृदेवताः । आगच्छंतु महाभागाः युष्माभी रक्षितास्त्विह । मदीयाः पितरो ये च कुले जाताः स
नाभयः । तेषां पिंडप्रदानार्थमागतोस्मि गयामिमां । ते सर्वे तृप्तिमायांतु गयाश्राद्धेन शाश्वतीं । आवाह्य ह्यथ पंचांगप्राणान
यम्य च ततः । पुनरावृत्तिरहितब्रह्मलोकाप्तिहेतवे । एवं संकल्प्य विधिवच्छ्राद्धं कुर्याद्यथाक्रमं । पितॄनावाहयाम्यत्र मंत्रैः
पिंडप्रदो भवेत् । तीर्थे प्रेतशिलादौ च स्वरूपेण सदृष्टते न वा । पंचाल्पसर्वतत्स्थानं पंचगव्यैः । अथ कु ३ अथ कु । क्षेमं मंत्रैरथ संपूज्य पदे देव
पद देवतां । यावत्तिला मनुष्यैस्तु गृहीताः पितृकर्मणि । गच्छंति भीता असुराः सिंहत्रस्ता यथा मृगाः । दत्वा श्राद्धं स पिंडानां तेषां द
क्षिणां नागतः । कुशैरास्तीर्यते तेषां तु संछन्नं दत्वा तिलोदकं । गृहीत्वांजलिना तेभ्यः पितृतीर्थेन यत्नतः । सक्तूनां मुष्टिना मु
ष्टिमात्रेण दद्याद्दक्षिणपिंडकं । तिलाज्यदधिमध्वादि पिंडद्रव्येषु योजयेत् । ततः पिता पितामहश्चेत्यादिरक्षा पिंडमंत्रः । सं
बंधिन मिलाक्षितकुशेष्वावाहयेत्ततः । ततोस्मत्कुले इत्यादि मंत्राः । एतांश्च सर्वमंत्रांश्च ब्राह्मलिंगात्तान्समुद्धृत्य पिंडान्दद्याद्यथा

Indira Gandhi National Centre for the Arts

पूर्वं पितॄनावाह्य पूर्ववत्॥ पिंडपात्रे तिलान् दत्त्वा पूरयित्वा शुभोदकैः। मंत्रेणानेन पिंडांस्तान् प्रदद्यादेकरंध्रयथा॥ परिषिंचेत्त्रिधा
सर्वान् प्रणिपत्य प्रसादयेत्। तथा॥ पितॄन् विसृज्य चात्मानं दाक्षिणः श्रावयेत् सुरान्। ततः साक्षिणः संतु मे देवा इत्यादिमंत्राः॥ सर्वस्थानेषु वै
चैषां पिंडदानं तु नारद। प्रेतपर्वतमारभ्य कुर्यात्तीर्थेषु च क्रमात्। तिलमिश्रान् यतः सक्तून् निक्षिपेत् प्रेतपर्वते। ये केचित् प्रेतरूपेण वर्तंते
पितरो मम। ते सर्वे तृप्तिमायांतु सक्तुभिस्तिलमिश्रितैः॥ आब्रह्मस्तंबपर्यंतं यत्किंचित् सचराचरं। मया दत्तेन तोयेन तृप्तिमायातु सर्व
शः। प्रेतत्वान्मुक्तिमुक्ताः स्युः पितरस्तस्य नारद। प्रेततीर्थस्य माहात्म्यादस्य चापि न विद्यते। पंचांगमिति। तिथ्यादिपंचकमुक्तमित्यर्थः। प्र
णवस्तथा व्याहृतिः गायत्री तच्छिरः प्रणवरूप पंचांगसहितं प्राणायामं कृत्वेत्यर्थ इति कश्चित्। तन्न। प्रणवादिविशिष्टस्यैव प्राणाया
मस्वरूपत्वात् पंचांगमित्यस्य वैयर्थ्यापातात्। उक्तोत्पत्तेर्वैयर्थ्यप्रसंगाच्च। पित्रादिमंत्रैरिति। पित्रादिमंत्रैः। प्रसंगात् पदश्राद्धे विशे ३०
षमाह। पदे चेति। तथा च विष्णुपदादिश्राद्धे पददेवतां विष्ण्वादिकां नाम्ना। चकारात् पित्रादीन् सतत्तन्मंत्रेण वर्जयेत् इत्यर्थः॥ एतानि स्थिति



एतानस्मत्कुलइत्यादीन्मित्राणि सख्यइत्यंतानावाहनमंत्रान् पिंडदानमंत्रांश्च स्त्रीलिंगतयोहित्वोहितावाहनमंत्रैः पूर्ववदा
वाह्योहितमंत्रैरेव पूर्ववत् पुंस्रो उशीवत्स्त्री षोडश पात्रापि पिंडा ... अथ सर्वप्रयोगक्रमकथनेनैव स्पष्टं भविष्यतीति नेह
व्याख्यायते॥ ॥ अथ तृतीयदिने पंचतीर्थीकृत्यं॥ ॥ वायवीये॥ आदौ तु पंचतीर्थेषु चोत्तरे मानसे विधिः। आचम्य कुशहस्तेन शिरस्य
भ्युक्ष्य वारिणा। उत्तरं मानसं गत्वा मंत्रेण स्नानमाचरेत्। उत्तरमानसे स्नानं करोम्यात्मविशुद्धये। सूर्यलोकादिसंसिद्धिसिद्धये पितृमुक्त
ये। स्नात्वाथ तर्पणं कुर्याद्देवादीनां यथाविधि। आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः। तृप्यंतु पितरः सर्वे मातृमातामहादयः। श्रा
द्धं सपिंडकं कुर्यात् स्वसूत्रोक्तविधानतः। पिता पितामहश्चैव तथैव प्रपितामहः। माता पितामही चैव तथैव प्रपितामही। मातामह
स्तत्पिता च प्रमातामहकादयः। तेषां पिंडो मया दत्तो ह्यक्षय्यमुपतिष्ठतां। ॐ नमो भानवे भर्त्रे सोमभौममज्ञरूपिणे। जीवभार्गवश
नैश्चरराहुकेतुस्वरूपिणे। सूर्यं नत्वा चपित्वा च ... पितॄन् सूर्यलोकं नयेत् पितॄन्। मानसं हि सरो ह्यत्र तस्मादुत्तरमानसं। उत्त

Indira Gandhi National
Centre for the Arts

ग·अ
३१

रात्रमानसान्मौनीव्रजेद्दक्षिणमानसं।उदीचीतीर्थमित्युक्तं तत्रोदीच्यां ... विमुक्तिदा।उदीच्यां मुंडपृष्ठस्य देवर्षिपितृसेवितं।मध्येम
नखलंतीर्थं पितॄणां मुक्तिदायकं।स्नातः कनकवद्भाति नरो याति पवित्रतां।अतः कनखलं लोके ख्यातं तीर्थमनुत्तमं।तस्य दक्षिण
भागे तु तीर्थं दक्षिणमानसं।दक्षिणे मानसे चैव तीर्थत्रयमुदाहृतं।स्नात्वा तेषु विधानेन कुर्याच्छ्राद्धं पृथक् पृथक्।दक्षिणमानसे स्ना
नं करोम्यात्मविशुद्धये।सूर्यलोकादिसंसिद्धिसिद्धये पितृमुक्तये।नमामि सूर्यं तृप्त्यर्थं पितॄणां तारणाय च।पुत्रपौत्रधनैश्वर्यआयु
रारोग्यवृद्धये।ब्रह्महत्यादिपापौघघातनाय विमुक्तये।दिवाकर करोमीह स्नानं दक्षिणमानसे।अनेन स्नानपूजादि कुर्याच्छ्राद्धं स
पिंडकं।कृत्वा नत्वाथ मौनार्कमिमं मंत्रमुदीरयेत्।कव्यवालइति श्लोकत्रयं प्रोक्तपर्वतवत्।फल्गुतीर्थं ततो गच्छेत्सर्वतीर्थोत्त
मोत्तमं।मुक्तिर्भवति कर्तॄणां पितॄणां श्राद्धतस्तथा।ब्रह्मणा प्रार्थितो विष्णुः फल्गुको ह्यभवत्पुरा।दक्षिणाग्नौ हुतं तत्र तद्द्रवः फ
ल्गुतीर्थकं।यस्मिन् फलति फल्गुर्गौः कामधेनुर्जलं मही।दृष्टिरंतर्गतं यस्मात्फल्गुतीर्थं न निःफलं।तीर्थानि यानि सर्वाणि भ ३१

वनेष्वखिलेषु चात्रानि स्नातुं समायांति फल्गुतीर्थं सुरैः सह।गंगापादोदकं विष्णोः फल्गुर्ह्यादिगदाधरः।स्वयं हि द्रवरूपेण त
स्माद्गंगाधिकं फलं।अश्वमेधसहस्राणां सहस्रं यः समाचरेत्।नासौ तत्फलमाप्नोति फल्गुतीर्थे यदाप्नुयात्।इयं च स्क्तिर्न
फलं।फल्गुतीर्थे विष्णुजले करोमि स्नानमादृतः।पितॄणां विष्णुलोकाय भुक्तिमुक्तिप्रसिद्धये।आग्नेये तु पितृब्रह्मलोकोक्ति वा२
:फलं तदुक्तं।फल्गुतीर्थे तीर्थराजे करोमि स्नानमादृतः।पितॄणां ब्रह्मलोकाप्त्यै आत्मनो भुक्तिमुक्तये इति फल्गुतीर्थे नरः
स्नात्वा तर्पणं स्नानमाचरेत्।सपिंडकं सूत्रोक्तेन भद्र पितामहं।नमः शिवाय देवाय ईशानपुरुषाय च।अघोरवामदेवाय स
द्योजाताय शंभवे।नत्वा पितामहं देवं मंत्रेणानेन पूजयेत्।फल्गुतीर्थे नरः स्नात्वा दृष्ट्वा देवं गदाधरं।आत्मानं पितृ
भिः सार्द्धं सनये हैष्णवं पदं।अष्टैतैः पंचभिः स्नानं च स्वपुष्पाद्यलंकृतिं।न कुर्याद्योगदा पापो ह्यस्य श्राद्धमपार्थकं।ॐ नमो वा
सुदेवाय नमः संकर्षणाय च।प्रद्युम्नायानिरुद्धाय श्रीधराय च विष्णवे।पंचतीर्थ्यां नरः स्नात्वा ब्रह्मलोकं नयेत् पितॄन्।मुंड

स्व४

Indira Gandhi National Centre for the Arts

ग.प्र.
३२

पृष्ठान्नगार्थंस्तात्फल्गुतीर्थमनुत्तमं।अत्रश्राद्धादिनासर्वेपितरोमोक्षमाप्नुयुः॥श्राद्धाविति।पंचतीर्थेषुपंचतीर्थीकर्मणाद्वादु
त्तरमानसेविधिः॥आचम्येति।उत्तरमानसंगत्वाकुशपाणिस्तदुदकेनाचम्यशिरश्चाभ्युक्ष्योत्तरेमानसइतिमंत्रेणस्नात्वादेवादितः
र्पणानंतरंआब्रह्मेतिमंत्रेणैकोंजलिंदत्वासपिंडकंश्राद्धंकृत्वापितापितामहइत्यादिनाश्लोकद्वयेनार्घ्यपिंडोदेयः।प्रेतशिला
वदितिसंपिंडितार्थः।उत्तरेमानसइति।अत्रचनियतांगमंत्रलिंगबलादात्मशुद्ध्यादित्रयंसमुच्चितमेवफलं।नतुयोगसिद्ध्या
येनप्रत्येकं।स्नानमंत्रश्चनियतस्नानमंत्रानंतरंपठनीयः आगत्यनामतेनिवेशइतिव्याख्यातः।एवंअंजलिमंत्रेपिप्रक्षेप्तंतर्पणा
नंतरंअत्रश्राद्धेकृत्यापितत्तृप्तिःफलं।पुष्करेश्राद्धकृत्यंश्राद्धमिष्टपक्षमप्येवमेवगयाशीर्षवटेफल्गुतीर्थेउत्तरमानसेमतंगवा
प्यांविष्णुपदेचेतिविष्णुस्मृतेः।ॐनमइतिसूर्यनतावर्चनेचमंत्रः।उदीचीतीर्थमितितत्रदक्षिणमानसेत्रिधाविभक्तेउत्तरभागेउदी ३२
चीतीर्थंमध्यभागःकनखलंदक्षिणभागेदक्षिणमानसमितिदक्षिणमानससमाख्यातेसरसितीर्थत्रयं।तत्रप्रत्येकंस्नाने

श्राद्धेचपिंडैःपितृविमुक्तिर्भवतीत्यर्थः।दक्षिणेमानसइत्यादिश्लोकत्रयेणस्नानंदक्षिणार्कपूजानत्यादियथालिंगंकार्यं।कश्चित्तु
दक्षिणेमानसइतिश्लोकःस्नानमंत्रः।नमामिसूर्यमितितुदक्षिणार्कनत्यादौ।ब्रह्महत्यादीत्यादिकंत्वधिकमित्याह।एतस्यार्कस्य
ग.३ मौनेनपूजनीयत्वान्मौनार्कइतिनाम।कव्यवालइतिमंत्रस्तत्रैवपठनीयः।ततःफल्गुतीर्थंगच्छेत्।मुक्तिरिति।श्राद्धकर्तुर्देवतयोर्मुक्ति
।फलमित्यर्थः।ब्रह्मणेति।विष्णुःफल्गुनदीरूपोभवत्।दक्षिणाग्नौयद्ब्रह्मणाहुतंततःफल्गुतीर्थंजातंतद्वदितिपाठेत[illegible]तस्य
द्वारसइत्यर्थः।यस्मिन्फल्गुतीर्थेफल्गुर्नदीगौःजलंचकामधेनुर्महीचयष्टिः।सहव्यस्त्रस्तागौरिदंत्रयमंतर्गतम[illegible]तितं
फलंयस्मात्फलत्यतःफल्गुतीर्थंननिःफलमित्यर्थः।शेषंस्पष्टं।तत्रफल्गुतीर्थइतिमंत्रेणस्नात्वादेवर्षिपितॄन्संतर्प्यस
पिंडकंस्वसूत्रोक्तविधिनाश्राद्धंकार्यं।नमेदथेति।ततोमधुस्रवादक्षिणकूलस्थंपितामहंनमःशिवायेतिमंत्रेणनमेत्।पूज
येच्च।फल्गुतीर्थइति।अत्रतर्पणादिव्यवहितमपिपूर्वकृतमेवस्नानमनूद्यतेगदाधरदर्शनविधानाय।नत्वपूर्वंविधीयते।

Indira Gandhi National Centre for the Arts

ग.प्र.
३३

अपूर्वांतरकल्पनापत्तेः। एतेन पुनः फल्गुतीर्थे स्नानमित्युक्तिः प्रत्युक्ता। ततः पंचामृतादिपूजा कार्या। तत्र पूजानमस्कारयोर्नमो
वासुदेवायेत्यादिमंत्रः। अकरणे आह्वानर्थक्या निष्ठा न्याय यथाशक्ति गदाधरपूजाया आवश्यकतोक्ता। पंचतीर्थ्यामिति। अत्रेव श
र्वक्तिस्यैव उत्तरमानसोदीचीकनखलदक्षिणमानसफल्गुरूपपंचतीर्थीस्नानस्य फलसंबंधार्थं पुनरनुवादः। संनिधौ तद्वं भाग
न फलार्थेन पुनः श्रुतिरिति न्यायात्। ननु स्नानांतरविधानं। आग्नेयमष्टाकपालं निर्वपेद् क्कामइति वदसंनिध्यभावेन फलं चा
कर्मसन्निधाविति न्यायाप्रवृत्तेः। फलांतरार्थत्वेन पूर्वश्रुतस्यापि संयोगपृथक्त्वन्यायेन ब्रह्महत्यानिरासार्थाश्वमेधवत्फलांतरार्थ
त्वश्रवणाविरोधाच्च॥ अत एवाग्निपुराणे पुनः स्नानानुवादोपि न कृतः। एतेन पंचसु तीर्थेषु पुनः स्नानं कार्यमिति वदंतः प्रत्युक्ताः
पंचतीर्थ्यां फल्गुतीर्थं पंचम ॰ मुक्तं तस्य फलमाह। मुंडपृष्ठादिति। अत्रानुष्ठानप्रयोगक्रमो वक्ष्यते॥ ॥अथ पंचतीर्थी दिनोत्त
रदिनकृत्यं॥ ॥तत्र वायुपुराणे। प्रथमे ह्नि विधिः प्रोक्तो द्वितीये दिवसे व्रजेत्। धर्मारण्यं तत्र धर्मो यस्माद्यागमकारयत्। म

त्रि२

राम
३३

तंगवाप्यां स्नात्वा तु तर्पणं श्राद्धमाचरेत्। गत्वा नत्वा मतंगेशमिमं मंत्रमुदीरयेत्। प्रमाणं देवताः संतु लोकपालाश्च साक्षिणः। मया
गत्य मतंगेस्मिन्पितॄणां निष्कृतिः कृता। पूर्ववद्ब्रह्मतीर्थे च कूपे श्राद्धादि कारयेत्। तत्कूपयूपयोर्मध्ये कुर्वंस्तारयते पितॄन्। धर्मं धर्मेश्व
रं नत्वा महाबोधितरुं तमेत्। चलद्दलाय वृक्षाय सर्वदा चलविक्लवे। बोधितत्वाय यज्ञाय पत्रश्वत्थाय ते नमो नमः। एकादशो सि रुद्राणां व
सूनामष्टमस्तथा। नारायणोसि देवानां वृक्षराजोसि पिप्पलेति। प्रथमेह्नीति पंचतीर्थ्यादिकृत्य दिनसमुदाये प्रथमे ह्नि विधिरुक्त
स्तत्रैव द्वितीयदिवसे धर्मारण्यं व्रजेदित्यर्थः। अग्निपुराणस्था अपि प्रथमे दिवसे तीर्थे गत्वा स्नुत्तरमानसे इति धर्मारण्ये द्वितीये
ह्नीत्यादयः। प्रथमादिशब्दा एवमेव व्याख्येयाः। धर्मारण्य एव मतंगवापी। तत्र स्नाने सर्वपापविमुक्तिः फलं पुष्करे स्नातमात्रः स
र्वपापेभ्यः प्रमुतो भवतीत्युपक्रम्य एवमेव फल्गुतीर्थे उत्तरमानसे मतंगवाप्यामिति विष्णुस्मृतेः। पूर्ववदिति। मतंगवापीवद्ब्रह्मतीर्थ
संज्ञके कूपे। श्राद्धादीति आदिपदात्तर्पणादि। तत्कूपेति। ब्रह्मकूपब्रह्मयूपयोर्मध्ये परं श्राद्धं कार्यं। ततो धर्मं धर्मेश्वरं नत्वा। महाबोधितरुं

Indira Gandhi National
Centre for the Arts

ग.प्र. अश्वत्थं। अत्रपद्यपिनतिमात्रमुक्तंतथापितदवस्तात्श्राद्धमपिकार्यं। महाबोधितरुंगत्वापिंडदःस्वर्गलोकभागितिअग्निपुराणवच
३४ नात्। वलद्दलायेतिमंत्रो अश्वत्थनमनेकचितिविमोनपठितोतदात्वमंनिकैर्वतिः। अनुष्ठानप्रयोगंतुवक्ष्यामः॥ ॥अथैतदग्निम
दिनकृत्यं॥ ॥वायवीये। तृतीयेब्रह्मसरसिस्नात्वाश्राद्धंसमाचरेत्। स्नानंकरोमितीर्थेस्मिन्नृणत्रयविमुक्तये। श्राद्धायपिंडदा
नायतर्पणायात्मशुद्धये। तत्कूपयूपयोर्मध्येकुर्वंस्तारयतेपितॄन्। स्नानंकृत्वोच्छितोयूपोब्रह्मणायूपइस्तुतः। कृत्वाब्रह्मसर
श्राद्धंब्रह्मलोकंनयेत्पितॄन्। गोप्रचारसमीपस्था आम्रा ब्रह्मकल्पिताः। तेषांसेचनमात्रेणपितरोमोक्षगामिनः। आम्रंब्रह्मसरो
द्भूतंसर्वदेवमयंतरुं। विष्णुरूपंप्रसिंचामिपितॄणांचविमुक्तये। आम्रश्चसिक्ताःपितरश्चतृप्ताएकाक्रियाद्व्यर्थकरीप्रसिद्धा।
आमस्यमूलेसलिलंचदेयंनोपेक्षणीयंविबुधैर्मनुष्यैः। यूपंप्रदक्षिणंकृत्वावाजपेयफलंलभेत्। ब्रह्माणंचनमस्कृत्यपितॄन् ग.प्र
ब्रह्मपुरंनयेत्। ॐनमोब्रह्मणेऽजायजगज्जन्मादिरूपिणे। भक्तानांचपितॄणांचतारणायनमोनमः। ततोयमवलिंदिद्यान्मंत्रे ३४



णानेनयत्नतः। यमराजधर्मराजौनिश्चलार्थंव्यवस्थितौ। ताभ्यांवलिंप्रदास्यामिपितॄणांमुक्तिहेतवे। ततःश्वानवलिंदद्यान्मंत्रेण
नेनतारद। विवस्वतकुलोद्भूतौद्वौश्यामशवलौश्वनौ। ताभ्यांवलिंप्रदास्यामिरक्षेतांपथिमांसदा। ततःकाकवलिंदिद्यात्पुनःस्ना
नंसमाचरेत्। ऐंद्रवारुणवायव्यायाम्यावैनैर्ऋतास्तथा। वायसाःप्रतिगृह्णंतुभूम्यांपिंडंमयार्पितमिति। तृतीयइतिपंचतीर्थीदिनम
ध्यायेतिपूर्ववद्व्याख्येयं। तद्विति। स्नानमितिमंत्रेणस्नात्वाकूपयूपयोर्मध्येतच्छ्राद्धंकुर्वन्पितॄंस्तारयतइत्यर्थः। उच्छ्रितइति। ब्रह्मणे
तिशेषः। ब्रह्मणोच्छ्रितोयूपोब्रह्मयूपइस्तुतप्रसिद्धइत्यर्थः। कृत्वेति। ब्रह्मसरसिश्राद्धस्यैवब्रह्मलोकनयनंफलांतरमुच्यते। तच्च
योगसिद्धिन्यायेनपूर्वोक्तपितृतरणफलेनसहविकल्प्यते। एतेनैतयोःफलयोःसमुच्चयएवएकत्रैवाम्नानादितिनिरस्तं।
गो. ततोधर्मारण्यतीर्थसमीपस्थपंकंचिदाम्रपितृमोक्षोद्देशेनआम्रमित्यादिमंत्रेणशिष्टाचाराकुशयुक्तेनब्रह्मसरःसमानीतानु
च्छिष्टशुद्धोदकेनप्रसिंचेत्। अत्रपद्यप्याम्राइतिवहुवचनंश्रुतंतथापिउद्देश्यगतत्वाद्बहुवदविवक्षितं। अतएवमंत्रेआम्रमि।

Indira Gandhi National
Centre for the Arts

श्र
३५

त्येकवचनं।अन्यथातद्विरोधः स्यात्।तेनयस्यकस्यचिदाम्रस्यसेकः कार्यः॥ॐनमइतिब्रह्मनमस्कारेमंत्रः।ततोयमराजेतिमंत्रेण
यमबलिः।दिवस्वतेतिमंत्रेणश्वबलिः।ऐंद्रेतिमंत्रेण॥काकबलिस्ततः स्नानं।तत्र अप स्थितत्वात् शिष्टाचाराच्चब्रह्मसरस्येवाद्वदेव
स्नानंबलिदाननिमित्तकाशुचित्वपरिहारार्थत्वाच्चंडालादिस्पर्शनिमित्तकस्नानवत्स्नानांगतर्पणादिरहितमेवकार्यं॥ ॥अ
थतत्तुत्तरदिनकृत्यं॥ ॥वायवीये।फल्गुतीर्थेचतुर्थेह्निस्नानादिकमथाचरेत्।गयाशिरस्यथश्राद्धंपदेकुर्यात्सपिंडकं।सा
क्षाद्गयाशिरस्तत्रफल्गुतीर्थाश्रयंकृतं।क्रौंचपादात्फल्गुतीर्थंयावत्साक्षाद्गयाशिरः।गयाशिरनगाद्वाश्रुसाक्षात्तत्फल्गुतीर्थ
कं।मुखेगयासुरस्यैतत्तस्माच्छ्राद्धमिहाक्षयं।आद्योगदाधरोदेवोथव्यक्ताव्यक्तात्मनास्थितः।विष्ण्वादिपदरूपेणपितॄणांमुक्तिहेतवे
।तत्रविष्णुपदंदिव्यंदर्शनात्पापनाशनं।स्पर्शनात्पूजनाच्चैवपितॄणांमोक्षकारणं॥श्राद्धंसपिंडकंकृत्वाकुलसाहस्रमात्मनः।वि
ष्णुलोकंसमुद्धृत्यनयेद्विष्णुपदंनरः।श्राद्धंकृत्वारुद्रपदेनयेत्कुलशतंनरः।सहात्मनाशिवपुरंतथाब्रह्मपदेनरः।ब्रह्मलोकंकु ३५

लशतंसमुद्धृत्यनयेत्पितॄन्।दक्षिणाग्निपदेश्राद्धीवाजपेयफलंलभेत्।गार्हपत्यपदेश्राद्धीराजसूयफलंलभेत्।श्राद्धंकृत्वाहवनी
येवाजपेयफलंलभेत्।श्राद्धंकृत्वासभ्यपदेज्योतिष्टोमफलंलभेत्।आवसथ्यपदेश्राद्धीसोमलोकमवाप्नुयात्।श्राद्धंकृत्वाशक्रपदेचैंद्र
लोकंनयेत्पितॄन्।श्राद्धीसूर्यपदेपापिनोर्कपुरंनयेत्।कार्त्तिकेयपदेश्राद्धीशिवलोकंनयेत्पितॄन्।श्राद्धंकृत्वागस्त्यपदेब्रह्मलो
कंनयेत्पितॄन्।काश्यपस्यपदेश्राद्धीपितॄन्ब्रह्मपदंनयेत्।अन्येषांचपदेश्राद्धीपितॄन्ब्रह्मपुरंनयेत्।सर्वेषांकाश्यपंश्रेष्ठंविष्णोरु
द्रस्यवैपदं।ब्रह्मणश्चपदंचापिश्रेष्ठंतत्रप्रकीर्तितं।प्रारंभेचसमाप्तौचतेषांमच्यतमंस्मृतं।श्रेयस्करंभवेत्तत्रश्राद्धंकर्तुश्चनारद।
तथा।गयाशिरसियःपिंडंयेषांनाम्नातुनिर्वपेत्।नरकस्थादिवंयांतिस्वर्गस्थामोक्षमाप्नुयुः।गयाशिरसियःपिंडंशमीपत्रप्रमा
णतः।कंदमूलफलाद्यैर्वादद्यात्स्वर्गंनयेत्पितॄन्।पदानियत्रदृश्यंतेविष्ण्वादीनांतदग्रतः।श्राद्धंकृत्वातेषुपिंडान्तुतेषांलोकान्न
येन्नरः।सर्वत्रमुंडपृष्ठाद्रिःपदैरभिःसुलक्षितः।प्रयांतिपितरःसर्वेब्रह्मलोकमनामयमिति॥ ॥चतुर्थेह्नीति।पंचतीर्थादिनाच्च

Indira Gandhi National Centre for the Arts

गं.श्रा. तुर्थे। अस्मिंश्च फ[ल्गु]स्नाने फल्गुतीर्थे पुण्यजले करोमि स्नानमाह तइति मंत्रपाठादिः पंचतीर्थी प्रकरणोक्तः स्नानविधिः क्रो
३८ न विष्णुपद्यस्तत्तद्युक्तं। प्रकरणेन पंचतीर्थ्यंतर्गतफल्गुतीर्थस्नानस्यैव निवेशात्। राजसूयवद्धि भूतब्राह्मणादिकर्तृकाववेष्टि
राजसूयांतर्गतावेष्टिधर्मातिदेशकनामलिंगवदत्रधर्मातिदेशकाभावाच्च। फल्गुतीर्थस्नानस्वरूपसमानधर्मेणातिदेशयाच्च
ज्जीवं गयावासिनां प्रात्याह्निकं तत्रत्यस्नानेपि प्रसंगात्। तस्मात्पदश्राद्धाद्यधिकारसिद्ध्यपेक्षितशुचितासंपादकमिदं स्नानं प्रात्याहि
कनित्यस्नानविधिनैव कार्यं। न तु पंचतीर्थ्यंतर्गतफल्गुतीर्थस्नानविधिनेति सिद्धं। गयाशिरसीति। अथ स्नानानंतरं गयाशिरसि
यानि पदानि तत्र श्राद्धं कुर्यात्। पद इत्येकवचनं पदत्वाभिप्रायेण। साक्षादिति। फल्गुतीर्थे अयं तत्समीपस्थं गयाशिरस्तस्मा
दति प्रशस्तं कृतं ब्रह्मादिभिरित्यर्थः। क्रोशमितत्वेप्यस्यायं प्रदेशोतिप्रशस्त इति भावः। तस्य प्रमाणमाह। क्रौंचपादादिति। क्रौंच
पादो मुंडपृष्ठाद्रिः। क्रौंचरूपेण हि मुनिर्मुंडपृष्ठे तपोकरोत्। तस्य पादांकितो यस्मात्क्रौंचपादः स ततः स्मृत इति वायवीये क्तः। तत ३८

श्च पश्चिमदिश्यवधिभूतं क्रौंचपादमारभ्य प्राच्यदिशि फल्गुतीर्थं यावत्तत्पर्यंतं प्रशस्तं गयाशिर इत्यर्थः। गयाशिरेति। अनंतरोक्तगया
शिरस्यैव तु शिलास्थनगादेश्च मध्ये साक्षात्फल्गुतीर्थप्रशस्तं फल्गुतीर्थमिति मध्यशब्दाध्याहारेणायोज्यं। प्रशस्तत्वे हेतुः। मुख्यमिति
प्रशस्ततोक्तेः फलमाह। तस्मादिति। व्यक्ताव्यक्तेति। प्रतिमास्वरूपी व्यक्तः। पदरूपेण चाव्यक्त इत्यर्थः। श्राद्धमिति। विष्णुपदे श्राद्धं कृत्वा कु
लसहस्रं समुद्धृत्य विष्णुलोकं नयेदिति संबंधः। सहस्रमेव साहस्रं। तथा ब्रह्मपद इति। श्राद्धं कृत्वेत्यनुषंगः। पंचपापिन इति। पंचमहापा
तकिनः। अन्येषामिति। क्रौंचगणेश्वरादीनां। अत एवोक्तं वायवीय एव। विष्णोः पदं रुद्रपदं ब्रह्मणः पदमुत्तमं। काश्यपस्य पदं दिव्यं द
हस्तोयत्र निर्गतौ। पंचाग्नीनां पदान्यत्र इंद्रागस्त्यपदे परे। रवेः कार्तिकेयस्य क्रौंचमातंगकस्य च। मुखलिंगानि सर्वाणि पदानीति निबोध
तेति। अग्निपुराणे। आवसथ्यस्य चंद्रस्य सूर्यस्य गणेस्य वा अगस्तेः कार्तिकेयस्य श्राद्धी तारयते कुलमिति। अत्र पद इत्यनुवर्त्तते। अ
न्यत्र तु सभ्यावसथ्यपदे न गणेपि तेगणपते च सोमम् क्रौंचगणेशपदानीत्येवं चतुर्दशोक्तानि तदुक्तं। ईशानविष्णुकमलासनकार्ति

Indira Gandhi National
Centre for the Arts

श्रा॰ केयवद्वित्रयार्करजनीशगणेश्वराणां क्रौंचामरेंद्रकलशोद्भवकश्यपानां पादान्नमामि सततं पितृमुक्तिहेतूनिति। सर्वेषामिति।
२ २७ श्रेष्ठं ततश्चैतदन्यतमपदादौ भवतीत्यर्थः। प्रारंभे चेति। अत्र च वायवीयपर्यालोचनया चतुर्णामाद्यंतश्राद्धे विकल्प एव। गारुडे तु ज्ञु
पदमुपक्रम्य श्राद्धमुक्तं। फल्गुतीर्थे चतुर्थेह्नि स्नात्वा देवादितर्पणं। कृत्वा श्राद्धं गयाशीर्षे कुर्याद्रुद्रपदादिह इति। अग्निपुराणेप्य
पमेव क्रमः। अन्येषां तु पदानां यथापाठमेव क्रमः। अथवाग्निवायुगरुडपुराणेषु भिन्नभिन्नक्रमोक्तेरनियम एव। अत एवाग्निपुरा
णे उक्तं। क्रमतोक्रमतो वापि गयायात्रा महाफला इति। श्रेयस्करमिति। श्रेयो मुक्तिः। श्रेयो निःश्रेयसामृतमिति कोशात्। ततश्च तत्र
पदेषु श्राद्धकर्तुः स्वकारात्पित्रादेः कर्मीभूतस्यैव मोक्षदमित्यर्थः॥ ॥अत्र पदेषु प्रथमेह्नि सक्तुपिंडाः। द्वितीये तिलगुडपिंडाः। तृ
तीये पायसपिंडाः। चतुर्थे दुग्धेन तर्पणं। पंचमे दीपदानमिति पंचदिनानि कृत्यं। अनवकाशे तु द्वित्रेष्वेकस्मिन्वाह्नि कृत्यपंचकं स्मि
कार्यमिति दाक्षिणात्याचारः॥ गयाशिरसीति। अत्र चाखितम्। एतान्मे वचनान्यां गयाशिरश्राद्धस्य मोक्षस्वर्गफलार्थत्वेबोधनाय २७

त्वक्तापि गयाशिरे गदाधरावासादिप्रदेशे फलद्वयोद्देशेन पदपिंडदानातिरिक्तं पिंडदानद्वयं कार्यमित्याह। तत्र। गयाशिरश्रा
द्धस्य पदश्राद्धे नैव समानदेशकालकर्तृकेण प्रसंगान्निर्वाहात्। व्याप्यतीर्थश्राद्धेन व्यापकतीर्थश्राद्धसिद्धेः। अघट्टकेऽकृत्वाञ्च। नच
पदगयाशिरश्राद्धयोः पृथक्फलश्रवणादेकप्रयोगेणवानेकफलजननेयागसिद्धिन्यायविरोधात्पृथगनुष्ठानमिति वाच्यं। गया
शिरःक्रोडीकृत एव पदादौ सफलश्राद्धविधानात्तन्न्यायविरोधाभावात्। माघक्रोडीकृतरथसप्तमीस्नानवत्। अपरपक्षक्रोडीकृत
तत्रयोदशपादिश्राद्धवच्च। अपंचितं चैतत्प्रयागमुंडनप्रकरण एवेति नेह तन्यते। किंच। गयाशिरसि यः पिंडं पदे कुर्यादित्युप
क्रम्य मध्ये पदश्राद्धान्यभिधाय गयाशिरसि यः पिंडमित्याद्युपसंहृतं। अंतउपक्रमोपसंहाराभ्यामपि न पदश्राद्धातिरिक्तं गया
शिरश्राद्धमनुष्ठेयं। अन्ये तु पदश्राद्धातिरिक्तं गयाशिरःश्राद्धं नास्त्येवातिनतेषांन वाप्रसंगः। फलांतरश्रवणं तु पदश्राद्ध एव फल
विकल्पार्थमित्याहुः। अथैतदुत्तरदिनकृत्यं। वायवीये पंचमेह्नि गदालोले कृत्वा स्नानादि पूर्ववत्। श्राद्धं सपिंडकं कुर्यात्तो

Indira Gandhi National Centre for the Arts

क्षयवटे नरः॥ तत्र श्राद्धादिकं कृत्वा पितॄन् ब्रह्मपुरं नयेत्॥ ब्रह्मप्रकल्पितान् विप्रान् भोजयेत् पूजयेदथ॥ कृतश्राद्धो क्षयवटे अनेनैव प्रयत्न अ
तः॥ दृष्ट्वा नत्वा च संपूज्य वटेशं च समाहितः॥ पितॄन् नयेद् ब्रह्मपुरम् अक्षय्यं वसनातनं॥ गयायां धर्मपृष्ठे च सदसि ब्रह्मणस्तथा॥ गयाशीर्षे वटे चैव
पितॄणां दत्तमक्षय्यं तथा॥ नयेत्पितॄन्रुद्रपदं नर्तीतप्रपितामहमिति। पंचमेद्धीति। पंचतीर्थी दिनात्पंचमे। फल्गुप्रवाह एव गदालोल
तीर्थं विद्यति। तत्स्वरूपं च तत्रैव। हेतासुरस्य शीर्षं तु गदया यद्द्विधाकृतं। यतः प्रक्षालिता तीर्थं गदालोलं ततः स्मृतमिति। हेतिनामक
स्यासुरस्य शिरो भित्वा यत्र गदा प्रक्षालिता गदाधरेण तद्गदालोलं तीर्थमित्यर्थः। तत्र स्नाने मंत्रः। गदालोले महातीर्थे गदाप्रक्षा
लने वरे। स्नानं करोमि शुध्यर्थम् अक्षय्याय सुरालये। इति। अयं च प्राक्कृतसकलमंत्रांते पठनीयः। आगतानामंते निवेश इति न्यायात्।
आदिशब्दात्तर्पणसंग्रहः। पूर्ववदिति। सकलगयाश्राद्धप्रकृतिभूतप्रेतपर्वतवत् श्राद्धं कुर्यादित्युत्तरत्रान्वयः। ततो क्षयवटे नर
ः। श्राद्धं कुर्यादित्यनुषज्यते। तत्र श्राद्धादिकमिति पूर्वविहितश्राद्धस्यैवानुवादः फलकीर्तनार्थः। ब्रह्मप्रकल्पितब्राह्मणभोजने नाम ३८

स्वर्गलोका२

ज५

वेदं तानाहवनीयस्थाने कृत्वा श्राद्धमध्य एवमनुमितं। अत एवाग्निपुराणे। येषु स्थानं पूजयिष्यंति गयायामागतान्नरः। हव्यकव्यै
दीनैः श्राद्धैस्तेषां कुलशतं व्रजेत्। नरकात्स्वर्गलोकाय स्वर्लोकात्परमां गतिं। इति ब्रह्मणा वरप्रदाने श्राद्धपूजनीयत्वस्योक्तत्वात्। ततश्च श्रा
द्धे यावंतोपेक्षिताः शक्याश्च तावंतस्त्वेव वटुवचनं द्वेधा ननु कापिंजलन्यायेन त्रित्वपरोऽत्र गास्त्विति वाक्यशेषस्य श्राद्धीयब्राह्मणसं
ख्याविधायकवचनस्यात्र तदपवादकत्वात्। यदप्यक्षयवटप्रकरणे एकस्मिन् भोजिते विप्रे कोटिर्भवति भोजितेति वचनं तदप्यसं
वाक्षयवटश्राद्धीयब्रह्मप्रकल्पितविप्रसंतानजविप्रभोजनस्य स्तुत्यर्थमनुवादकं। एकं वृणीते द्वौ वृणीत इतिवत्। ननु स्वतंत्रैकवि
प्रभोजनफलबोधकं विधिविभक्त्यभावात्। अयं च शुभमधीतं तेन तेन ह्यस्पष्टं भवतीतिवत्। वटश्राद्धप्रकरणे त्वपार्थ्यान्निष्क्रयाद्
त्रिसत्रन्यायानवतारात्तेन यत्केन विदुक्तं वटश्राद्धानंतरं ब्रह्मप्रकल्पितब्राह्मणत्रयं पितृब्रह्मलोकनयनफलार्थं तदनंतर
कब्राह्मणभोजनमप्यर्घ्यादिकं फलार्थं कार्यमिति तत्परिभावनीयमेव। अत्र च वटश्राद्धे गयास्थब्राह्मणनियमस्तस्मान्नैतद

Indira Gandhi National Centre for the Arts

।।भिब्राह्मणांतरमपि भोज्यं। वटश्राद्धातिरिक्तश्राद्धेत्वनियम इति पूर्वमेवोक्तं। कृतश्राद्ध इति। एतस्यापि तद्दिन इत्यग्रेन्वयः। अत्र च श्रा
द्धमुद्दिश्यान्नस्य संस्कृतता विधीयते। न तु गयाश्राद्धांतराणि यथालाभमामादिनापि कार्याणि। वटश्राद्धं तु पाकेनैव कार्यमित्यर्थः। दृ
ष्ट्वेति। ततो वटेशं दृष्ट्वा एकार्णवे वटस्याग्रे यः शेते योगनिद्रया। बालरूपधरस्तस्मै नमस्ते योगशायिने इति मंत्रेण नत्वा गोपचारैः पूज
येदित्यर्थः। वटेशं चेति चकारात् रुद्रपदवटं पितामहयोर्ग्रहणं। तत्र तावद्रुद्रमंत्रोक्तः। ततश्च संसारवृक्षशस्त्राय शेषपापक्षयाय च। अक्ष
यब्रह्मदात्रे च नमो रुद्राय वटाय वै इति मंत्रेण वटं नत्वा पूजयेत्। ततः कल्लोमाहेश्वरालोकायेन तस्माद्धद्धारः। लिंगरूपो भवत्तं च वृद्धं देश्री प४
पितामहमिति मंत्रेण प्रपितामहं नत्वा पूजयेदित्यर्थः। गयायामिति। अत्र च वटप्रकरणे सत्यपि प्रसंगात् गयादिश्राद्धेपि फलोक्तिर्दृष्टं
ततया। एवं सप्त दिनानि गयाकार्यं नियतं। वक्ष्यमाणतीर्थानि तु सार्द्धमासं वा समासं वा सेवातदंतराय यथायोगं कार्याणि। तत्रापि वट
श्राद्धं सकलगयातीर्थानि कृत्वांते कार्यं तत्र वा दक्षिणमानसीपुलकमोतानातराद्धकर्म याद्यात्। अक्षय्यो नो कार्य इति शिष्टाः। यद्यपि वा ३णी

य्वग्निपुराणाद्यालोचनया दिनकृत्ये तीर्थांतरकृत्ये च क्रमविसंवादो दृश्यते तथापि वायुपुराण एव भूयस्त्वेनोभयकृतीति न्यायेन ग
याकृत्योत्यत्यवगमात्तदनुसारेणैव क्रमः। यद्वा वायुपुराणानंतरस्क्रमप्रतिपादकाथ ततः शब्दाद्यानर्थक्यपरिहाराय क्रमविकल्प ए
व। वस्तुतस्तु क्रमतोऽक्रमतो वापि गयायात्रा महाफलेत्यग्निपुराणे क्रमान्यत्वेपि न दोषः। अज्ञातक्रमपुरुषाधिकारिकं वेदवचनं ज्ञेयं।
सर्वथा पितृप्रेतशिला कार्यं प्रथममेव। तत्र तथा नियमस्य पूर्वमुक्तत्वात्॥ ॥इति नारायणभट्टविरचिते त्रिस्थलीसेतौ गयाप्रकरणे नि
यतसप्तदिनकृत्यं॥ ॥अथानियतदिनकर्तव्यानि गयायां नानातीर्थान्यनेकपुराणालोचनयोच्यंते। तत्र वायुपुराणे तावत्। उपो
षितोऽथ गायत्रीतीर्थे महानदीस्थिते। गायत्र्याः पुरतः स्नात्वा प्रातः संध्यां समाचरेत्। श्राद्धं सपिंडकं कृत्वा नयेद्ब्राह्मणतां कुलं। ती
र्थे समुद्यीते स्नात्वा सावित्र्याः पुरतो नरः। संध्यामुपास्य मध्याह्ने नयेत्कुलशतं दिवं। प्राचीसरस्वती स्नातः सरस्वत्यास्ततोग्रतः। संध्या
मुपास्य सायाह्ने नयेत्सर्वं ततो कुलं। वरुजन्मकृतात्संध्यालोपान्मुक्तस्त्रिसंध्यकृत्। विशालायां लेलिहाने तीर्थे च भरताश्रमे

Indira Gandhi National Centre for the Arts

दत्तां।कीकटेमुंडपृष्ठेगदाधरसमीपतः।तीर्थेत्र्याकाशगंगायांगिरिकर्णमुखेषुच।श्राद्धदःपिंडदोब्रह्मलोकंकु…लशतंनयेत्।स्ना
नागोदोवैतरण्यांत्रिःसप्तकुलमुद्धरेत्।देवनद्यांगोप्रचारेश्राद्धदस्वर्नयेत्पितॄन्।पुष्करिण्यांघृतकुल्यामधुकुल्यांतथैवच।उष्करि
ण्यांगदालोलेतीर्थेवामरकेतथा।कोटितीर्थेरुक्मकुंडेपिंडदःस्वर्नयेत्पितॄन्।मार्कंडेयेशकोटीशेनत्वास्यात्पितृतारकः।उपो
षितइति।प्राक्दिनेकृतोपवासोथप्रातःगयाग्राममध्यस्थगायत्रीसंमुखप्रदेशेमहानदीस्थेगायत्रीतीर्थेस्नानसंध्यावंदनश्राद्धा
निकुर्यादित्यर्थः।स्नानादित्रयसमुदायस्यात्रकुलब्राह्मणतासंपादनंफलं।फलाकांक्षायांस्नानसंध्योपोरपिशब्दोपस्थितत्वेनला
घवात्तस्यैवान्वयात्।नतुस्वर्गःकल्पनागौरवात्।एवमुत्तरयोरपि।प्राचीसरस्वतीस्नातइत्येकंपदं।वऊजन्मेति।तीर्थत्रयेसंध्या
त्रैवसंध्यात्रयमात्रेफलांतरमिदं।विशालायामिति।विशालादितीर्थसप्तकमध्येन्यतरस्मिन्श्राद्धपिंडदानाभ्यांपितृब्रह्मलोक ४
नयनंभवतीत्यर्थः।स्नातइति।स्नात्वागोदःगोदाता।त्रिःसप्तकुलएकविंशतिकुलं।गोदेवैतरण्यामितिपाठेगोदेतीर्थे।अत्रयासा

वैतरणीनामनदीत्रैलोक्यविश्रुता।सावतीर्णामहाभागापितॄणांतारणायवै।इतिमंत्रेणवैतरण्यास्तरणमपिकार्यमाचारात्।दे
वनद्यामितिनवतीर्थानि।शेषंस्पष्टं।अथपांडुशिलादि।तत्रवायवीयेसुवर्णपारियात्रकवनेसपार्वतीकःशंकरःपुतंवधींरेमा।
ततःकदाचिन्मरीचिस्तद्वनंफलपुष्पाद्यर्थंप्रविष्टः।सचमहेशेनशप्तः।यस्मात्त्वंममसुखविघातंकृतवान्तस्माद्दीनदुःखीभवेति।
ततोमरीचिनास्तुतस्तुष्टःशंकरोममशापमुक्तिंकुर्विति।तेनप्रार्थितोगयायांतेशापांतोभवितेत्युक्तोगयांगत्वाशिलापांडुश्वरक्ष
पस्तेपे।तेनतपसासपांडुरवर्णोभूत्।ततोब्रह्मविष्ण्वादिभिरागत्योक्तंवरंवृणीष्वेति।ततोमरीचिराह।हरशापाद्विमुक्तोहं।शि
लाभवतुपावनी।पितृमुक्तिकरीचास्यात्तथेत्युक्त्वादिवंययुः।पांडुशिलेतिसाप्रोक्ता।श्राद्धंतत्राक्षयंभवेत्।तथा।युधिष्ठिरस्त
…ाकर्तुंपितृकार्यंतुतांययौ।श्राद्धकालेपांडुनाकंमहस्तेदेहिपिंडकं।हस्तंत्यक्त्वाशिलापांवैपिंडदानंचकारसः।शिलापांपि
मोदानेनप्रहृष्टोव्यासनंदनः।वरंददौसपुत्रायराज्यंकुरुमहीतलेअकंटकंतुसंपूर्णमेकच्छत्रंतुपुत्रक।स्वर्गंव्रजशरीरेणनर

..ष्मान् दिवं नयाः इत्युक्ताः ञ्यययो पांडुः शाश्वतं पदमव्ययं इति। तथा वाक्यस्यापि तत्र श्राद्धादिदमेव फलमिति तात्पर्यं। अयं च पांडुशिला
ईश्वता महसमीपस्थैवेंघं कवनेस्ति। तथा घृतकुल्या मधुकुल्या देविका च महानदी। शिलायां संगतास्तत्र मधुश्रवा प्रकीर्तिता। अयुत
मश्वमेधानां स्नानकृल्लभते नरः। तर्पयित्वा पितॄंश्चैव श्राद्धं कृत्वा सपिंडकं। सहस्रकुलमुद्धृत्य नयेद्विष्णुपदं नरः। उद्भिज्जांस्वेदजा
वापि ह्यंडजा यैतरायुजाः। मधुस्रवां समासाद्य सृता विष्णुपुरं ययुः। घृतकुल्येति एता अश्वतरसोपि मुंडपृष्ठाद्दक्षिणतः शिलासंगताम
धुस्रवापदवाच्या भवंतीत्यर्थः। ययुर्यांतीत्यर्थः। तथा। दशाश्वमेधिके हंसतीर्थे श्राद्धी दिवं व्रजेत्। दशाश्वमेधहंसो च नत्वा शिवपुरं
व्रजेत्। पितामहाद्दक्षिणतो महानद्यां दशाश्वमेधः। मातंगस्यपदे श्राद्धी नयेद्ब्रह्मालयं पितॄन्। निर्मथ्याग्निं शमीगर्भे विधिविद्भिर्द्विजादि
भिः सह। मथोकुंडं हि तत्तीर्थं पितॄणां मुक्तिदायकं। तर्पणात्पिंडदानाच्च स्नानकृन्मुक्तिमाप्नुयात्। मथोकुंडमुद्यंतपर्वतनिकटे। ४१
पितॄन्स्वर्गं नयेन्नत्वा रामेशं गयाकेश्वरौ। गयाकूपे पिंडदानादश्वमेधफलं लभेत्। गयाकूपपतितादीनामपि पित्रादीनां मरणावर्षांत

रवत्सरादौ श्राद्धं कार्यं तदुक्तं ब्रह्मपुराणे। क्रियते पतितानां तु गते संवत्सरे क्वचित्। देशधर्मप्रमाणत्वाद्गयाकूपे स्वबंधुभिः। मार्तंडपा
दकूपे वा श्राद्धं हरिहरं स्मरन् इति। स्मरन्निति तृतीयावज्ञवचनार्थे १ थमैकवचनं। अत्र पतितशब्देन सर्वे दुर्मरणभूता पातकिनश्च गृह्य
ते। तदुक्तं तत्रैव। शृंगिदंष्ट्रिनखिव्यालविषवह्निस्त्रियाजलैः। सुदूरात्परिहर्तव्याः कुर्वन्क्रीडां मृतस्तु यः। नागानां विप्रियं कुर्वन् हतश्चा
प्यथ विद्युता। निगृहीताः स्वयं राज्ञा चौर्यदोषेण कुत्रचित्। परदारान् रमंतश्च द्वेषात्तत्पतिभिर्हताः। असमानैश्च संकीर्णैश्चांडाला
द्यैश्च विग्रहं। कृत्वा तैर्निहताः शश्वच्चांडालादीन् समाश्रिताः। गराग्निविषदाश्चैव पाषंडाः क्रूरबुद्धयः। क्रोधात्प्रायं विषं वह्निं शस्त्रमुद्बंध
नं जलं। गिरिवृक्षप्रपातं च ये कुर्वंति नराधमाः। कुशिल्पजीविनो ये च सूनालंकारकारिणः। मुखेभगास्तु ये केचित् क्लीवप्राया नपुंसका
ः। ब्रह्मदंडहता ये तु ये वापि ब्राह्मणैर्हताः। महापातकिनो ये च पतितास्ते प्रकीर्तिता इति। शरो नालिकेरजलक्षुरकृतः। पानकवि
क्रोधावांतरविपरूपस्तद्दाता शरदः। सूनावधस्थानं शूलादि तत्रालंकारकारिणस्तदविक्रेतारः स्वर्णकाराः संत इत्यर्थः। ब्रह्मदंडहता

Indira Gandhi National
Centre for the Arts

ब्राह्मणशापहताः।अन्यत्स्पष्टं॥तथा।भस्मकूपेभस्मनाथस्नानात्तारयेत्पितॄन्।धौतपादेथनिःक्षीरासंगमेस्नानकृन्नरः।श्राद्धीरामपु
ष्करिण्यांब्रह्मलोकंनयेत्पितॄन्।सुषुम्नायांमहाकाल्यांत्रिःसप्तकुलमुद्धरेत्।सुषुम्नागयायाममध्ये।स्नातोनत्वावसिष्ठेशंतस्यातीर्थे
श्वमेधभाक्।गृध्रवटेनरेवशिष्ठेश्वरतत्तीर्थे।इष्टिंचक्रेश्वमेधाख्यांवशिष्ठोमुनिसत्तमः।इष्टितोनिर्गतःशंभुर्वरंदत्तुवशिष्ठकंप्राहे
तितंवसिष्ठोपिशिवतुष्टोस्मिमेयदि।वस्तव्यंसर्वदेवाद्यैस्तथेत्युक्त्वाशिवंस्थितः।पिंडदोधेनुकोंकामधेनुपदेषुच।स्नातोनत्वाकामधे कामः४
नुंब्रह्मलोकंनयेत्पितॄन्।कर्दमालेगयानाभौमुंडपृष्ठसमीपतः।स्नात्वाश्राद्धीनयेत्स्वर्गंपितॄन्नत्वाचचंडिकां।फल्गुचंडीश्मशाना
रव्यसंगमेशान्समर्च्यचापितॄन्स्वर्गंनयेदित्यनुषंगः।गयागजोगयादित्योगायत्रीचगदाधरः।गयागयाशिरश्चैवषडक्षयामुक्तिदायि
का।एतेषट्पूजापिंडदानागयायांमुक्तिदायकाइत्यर्थः।गयायांधुटपोत्सर्गात्त्रिःसप्तकुलमुद्धरेत्।यत्रतत्रस्थितादेवारूपयोवि
जितेंद्रियाः४।श्राद्धंगदाधरंध्यायन्श्राद्धपिंडादिनाततः।कुलानांशतमुद्धृत्यब्रह्मलोकंनयेत्पितॄन्।यतोयत्रतत्रदेवादयःस्थिता ४२

स्तत्इतिसंबंधः।ततोदध्योदनेनैवदत्वानैवेद्यमुत्तमं।जनार्दनायदेवायसंपूज्यचयथाविधि।दद्याद्दक्षपिंडांस्ततच्छेषेणैवजीवतां
।तच्छेषेणदध्योदनशेषेण।तथा।जनार्दनोभस्मकूटेतस्यहस्तेतुपिंडदः।मंत्रेणचात्मनोन्येषांसव्येनापितिलैर्विना।जीवतांदधिसंमि
श्रः।सर्वेतेविष्णुलोकगाः।आत्मानंपितृभिस्सार्द्धंविष्णुलोकंनयेन्नरः॥मंत्रश्च॥एषपिंडोमयादत्तस्तवहस्तेजनार्दन।गयाश्राद्धंत्वयादे
यंमह्यंदेवमृतेमयि।यस्मात्पिंडोमयादत्तस्त्वामुद्दिश्यजनार्दन।देहिदेवगयाशीर्षेतस्मैतस्मैमृतेतुतौजनार्दननमस्तुभ्यंनमस्तेपितृ
रूपिणे।पितृपात्रनमस्तुभ्यंनमस्तेमुक्तिहेतवे।नमस्तेपुंडरीकाक्षऋणत्रयविमोचन।लक्ष्मीकांतनमस्तुभ्यंनमस्तेपितृमोक्षदेति।
गयायांपितृरूपेणस्वयमेवजनार्दन।तंदृष्ट्वापुंडरीकाक्षंमुच्यतेचऋणत्रयात्।भीमज्ञानुवसंपात्यनत्वाभीमोजनार्दनं।श्राद्धंसपिं
डकंकृत्वाभ्रातृभिर्विष्णुलोकभाक्।भ्रातृभिर्युधिष्ठिरादिभिःसहेतिसहार्थेतृतीया।अत्रवक्तव्यंप्रागेवोक्तं।तथा।रामेवनगतेशैल
मालभ्यभरतस्थितः।पित्रेपिंडादिकंदत्वारामेशंस्थाप्यतत्रच।स्नात्वाथरामेशंरामंसीतासमन्वितं।तत्रश्राद्धंसपिंडंचकृत्वाविष्णु
तत्री

Indira Gandhi National
Centre for the Arts

पुरंव्रजेत्॥पितृभिःसहधर्मात्माकुलानांवशतैःसह॥महानदीपरपारस्थभरताश्रमसंनिधानेमहानघांस्नात्वारामेश्वरामश्रीताहृ
ष्टारामपदेसपिंडश्राद्धंकार्यमित्यर्थः॥शिलादक्षिणहस्तेवस्त्रापितःकुंडपर्वतः॥तत्रश्राद्धादिनासर्वान्पितॄन्ब्रह्मपुरंनयेत्॥कुं
डेनाथतपस्वंसीताइदंदक्षिणेगिरौ॥तथा॥मतंगस्यपदेपुण्येपिंडदःस्वर्गंनयेत्पितॄन्॥वामहस्तेशिलायाश्चमुद्यंतोनिहितोगि
रिः॥आनीतोह्युदयाद्रेःसअगस्त्येनमहात्मना॥स्थापितःपिंडदस्तत्रपितॄन्ब्रह्मपुरंनयेत्॥कुंडमुद्यंतकंतत्रस्वात्मनातपसेकृतं
॥ब्रह्मातत्रैवसावित्रीकुमाराभ्यांस्थितस्त्विह॥हाहाहूहूप्रभृतयोगीतनादंप्रचक्रिरे॥अगस्त्योभगवान्यत्रतपश्चोग्रंचचारह॥ब्र
ह्मनैस्कवरान्लेभेमाहात्म्यंभुविदुर्लभं॥लोपामुद्रातथाभार्यापितॄणांपरमांगतिं॥माहात्म्यादिकंवरत्रयंलेभेइत्यर्थः॥स्नात्स
त्रवमध्याह्नेसावित्रीसमुपास्यच॥कोटिजन्मभवंहित्वाधनाढ्योवेदपारगः॥तत्रउद्यंतककुंडेमध्याह्नेस्नात्वासावित्रीनामिकामर ४२
ध्याह्नसंध्यांकुर्यादित्यर्थः॥अगस्त्यपदेस्नात्वापिंडदोब्रह्मलोकगः॥पितृभिःसहधर्मात्मापूज्यमानोदिवौकसैः॥तथा॥ब्रह्मयोनिं

प्रविश्याथनिर्गच्छेद्यस्तुमानवः॥परंब्रह्मसयातीहविमुक्तोयोनिसंकटात्॥नत्वागयाकुमारंचब्राह्मण्यंलभतेनरः॥सोमकुंडाभिषेका
द्यैःसोमलोकंनयेत्पितॄन्॥अभिषेकःस्नानं॥आदिपदात्तर्पणश्राद्धपिंडदानानि॥बलिःकाकशिलायांचकाकेभ्यःऋणमोक्षदः॥ऋण
मोक्षदःसद्योमोक्षदः॥स्वर्गद्वारेश्वरंनत्वास्वर्गाद्ब्रह्मपुरंव्रजेत्॥प्रथमंस्वर्गंप्राप्यततोब्रह्मपुरंव्रजेदित्यर्थः॥पिंडदोघोमगंगायांनिर्मल
त्वंनयेत्पितॄन्॥शिलायादक्षिणहस्तेभस्मकूटमधारयत्॥धर्मोजस्तत्रचहरःस्नानंससमकारयत्॥यतोसोभस्मकूटाद्रिर्भस्मस्नाना
त्तुनाकदः॥तत्रत्यभस्मस्नानादित्यर्थः॥वटाव[illegible]टेश्वरस्तत्र [illegible] स्थितश्चप्रपितामहः॥तदग्रेरुक्मिणीकुंडंतस्याग्रेकपिलानदी॥क
पिलेशोनदीतीरेअमासोमसमागमे॥कपिलायांनरःस्नात्वाकपिलेशंनमेद्यजेत्॥यजेत्पूजयेत्॥श्राद्धदःस्वर्गगामीस्यान्महेशीकुं
डएवचगौरीचमंगत्वातत्रसर्वसौभाग्यदायिनी॥तथा॥शिलायावामपादेतुप्रेतकूटोगिरिर्धृतः॥धर्मराजेनपादाग्रयोगिरिःप्रेतशि
लाश्रयः॥पादेनदूरेनिक्षिप्तःशिलयापापभावतः॥प्रेतभावस्वरूपेणकरग्रहणकानने॥पृथक्स्थिताश्चबहवोविघ्नकारिणएववा॥

Indira Gandhi National Centre for the Arts

श्राद्धादिकरणंनृणांतीर्थेपितृविमुक्तिदं।गतशिलादिसंपर्कात्प्रेतकूटःपवित्रतां।प्रेतकुंडंचतत्रास्तेदेवास्तत्रपदेस्थिताः।श्राद्धपिंडा
दिकृत्स्नातःप्रेतत्वान्मोक्षयेत्पितॄन्।आदौस्नातस्तुश्राद्धादिकृत्।तथावैकुंठोलोहदंडश्चहेमकूटोगिरिर्धृतः।श्राद्धपिंडादिकृत्तत्रपि
तॄन्...लपुरंनयेत्।शिलादक्षिणपादेतुगृध्रकूटोगिरिर्धृतः।धर्मराजेनतत्तेषांकरणायसुपावनः।गृध्ररूपेणसंसिद्धास्तपःकृ
त्वामहर्षयः।अतोगिरिर्गृध्रकूटस्तत्रगृध्रेश्वरःशिवः।दृष्ट्वागृध्रेश्वरंस्नात्वायातिशंभोःपुरंनरः।तत्रगृध्रवटंनत्वाप्राप्तकालोदिवंव्रजे
त्।तत्रगृध्रगुहायांचश्राद्धदःपितृलोकभाक्।ऋणमोक्षंपापमोक्षंशिवंदृष्ट्वाशिवंव्रजेत्।आदिपादेनगिरिणासमाक्रांतंशिलोद
रं।तत्रास्तेगजरूपेणविघ्नेशोविघ्ननायकः।तंदृष्ट्वामुच्यतेविघ्नैःपितॄन्शिवपुरंनयेत्।गायत्रीवगयादित्यंस्नातोदृष्ट्वादिवंव्रजेत्।
।ब्रह्माणंवादिपादस्थंदृष्ट्वास्यात्पितृतारकः।नाभौचपिंडदोयस्तुपितॄन्ब्रह्मपुरंनयेत्।नितंबेमुंडपृष्ठस्यअरविंदवनंत्वभूत्।मुं ४४
डपृष्ठारविंदाद्रीदृष्ट्वापापंविनाशयेत्।क्रौंचरूपेणहिमुनिर्मुंडपृष्ठेतपोकरोत्।तस्यपादांकितोयस्मात्क्रौंचपादस्ततःस्मृतः॥

ल२ श्रा२

स्नातोजलाशयेतत्रनयेत्स्वर्गंकुलत्रयं॥ ॥अथाग्निपुराणेगयातीर्थानि॥ ॥गायत्र्यांचमहानद्यांस्नानंसंध्यांसमाचरेत्।गायत्र्याग्रे
ग्रतःप्रातःश्राद्धपिंडमथाक्षयं।मध्याह्नेचोद्यतेस्नात्वागीतनादैर्दिनाद्यथ।सावित्रीपुरतःसंध्यापिंडदानंचतत्पदे।अगस्त्यस्यपदेकु
र्याद्योनिद्वारंप्रविश्यच।निर्गतोनपुनर्योनिंप्रविशेन्मुच्यतेभयात्।बलिःकाकशिलायांचकुमारंचनमेत्ततः।स्वर्गद्वारेसोमकुंडेवा
युतीर्थेचपिंडदः।भवेद्राकाशगंगायांकपिलायांचपिंडदः।कपिलेशंशिवंनत्वारुक्मकुंडेचपिंडदः।कोटितीर्थेचकोटीशंगत्वा
सोमपदेन्नदः।गदालोलेवामनकेगोप्रतारेचपिंडदः।स्नात्वानरोवैतरण्यामेकविंशकुलेहृतिः।गोदःपिंडप्रदातास्यात्क्रौंच
पादेचपिंडदः।तृतीयायांविशालायांनिर्विपाश्यांपिंडदः।ऋणमोक्षेपापमोक्षेभस्मकुंडेचभस्मना।स्नानकृन्मुच्यतेपाप
न्नमेद्देवंजनार्दनं।त्वयःपिंडामयादत्तास्तवहस्तेजनार्दन।परलोकगतेमह्यमक्षय्यमुपतिष्ठतां।गयायांपितृरूपेणस्वयमेव
जनार्दनः।तंदृष्ट्वापुंडरीकाक्षंमुच्यतेचऋणत्रयात्।मार्कंडेयेश्वरंनत्वानाम्नासर्वेश्वरंनरः।गृध्रकूटेधौतपादेकादंविन्यांच

Indira Gandhi National Centre for the Arts

पिंडदः।पुष्करिण्यांकर्दमालेरामतीर्थेचपिंडदः।प्रभासेशंनमस्प्रेतशिलायांपिंडदोभवेत्।दिव्यंतरिक्षभूमिस्थाःपितरोबांधवादय
:।प्रेतादिरूपमुक्ताःस्युःपिंडेदत्तेर्मयाखिलाः।स्थानत्रयेशिलायांचगयाशिरसियथावत्।प्रभासेप्रेतकुंडेचपिंडेतारयतेकुलं।वशिष्ठे
शंनमस्कृत्यतत्कुंडेपिंडदोभवेत्।गयानाभौप्रसन्नायांगयाकेशेचपिंडदः।गदाधरात्ततोमुंडपृष्ठादेव्याश्चसन्निधौ।मुंडपृष्ठंनमेदा
दिक्षेत्रपालादिसंयुतां।पूजयित्वाभयंतस्माद्विपद्रोगादिनाशनं।ब्रह्माणंचनमस्कृत्यब्रह्मलोकंनयेत्कुलं।सुभद्रांबलभद्रंचसंपूज्य
पुरुषोत्तमं।सर्वकामसमायुक्तःकुलमुद्धृत्यनाकभाक्।माधवंपूजयित्वातुदेवोवैमानिकोभवेत्।महालक्ष्मींप्राप्यगौरींमंगलांच
सरस्वतीं।पितॄनुद्धृत्यस्वर्गस्थोमुक्तिभोगोजसासुधीः।द्वादशादित्यमभ्यर्च्यवह्निंरेवंतसिंदुकं।रोगादिमुक्तःस्वर्गीस्यात्कीकपर्द्दि
विनायकं।प्रपूज्यकार्त्तिकेयंचनिर्विघ्नःसिद्धिमाप्नुयात्।सोमनाथंचकालेशंरामेशंब्रह्मकेश्वरं।अष्टौलिंगानिगुह्यानिपूजयित्वा लिं२
थसर्वभाक्।नारायणंवराहंचनरसिंहंनमेच्छ्रिये।ब्रह्मविष्णुमहेशाख्यंत्रिपुरायमहेशदं।सीतांरामंचगरुडंवामनंसंप्रपूज्यच ४५

।सर्वकामानवाप्नोतिब्रह्मलोकंनयेत्पितॄन्।देवैःसार्द्धंचसंपूज्यदेवमादिगदाधरं।ऋणत्रयविनिर्मुक्तस्तारयेत्सकलंकुलं।देवरूपाशिलापुण्या
स्माद्देवमयीशिला।गयायांनहितत्स्थानंयत्रतीर्थंनविद्यते।फल्गवीशंचैवचंडींचप्रणम्यांगारकेश्वरं।मातंगस्यपदेश्राद्धीभरताश्रमकेभवेत्।हंस
तीर्थेकोटितीर्थेचप्रपिंडशिलानदः।तत्रस्यादग्निधारायांमधुस्रवसिपिंडदः।इंद्रेशंकपिलेशंचनमेद्वृद्धिविनायकं।पिंडदोधेनुकारण्येपदेदे
नमेच्चगां।सर्वान्पितॄन्स्तारयेच्चसरस्वत्यांचपिंडदः।संध्यामुपास्यसायाह्नेनमेत्स्त्रीसरस्वतीं।त्रिसंध्याकृद्भवेद्विप्रोवेदवेदांगपारगः।गयांप्रदक्षि
णीकृत्यविप्रान्संपूज्यतत्र्ववा।अन्नदानादिकंसर्वंकृतंतत्राक्षयंभवेत्।स्मृतिरत्नावल्यां।महानदीब्रह्मसदोवरश्चप्रभासमुद्यंतमथोगयाशिरःस
रस्वतीधेनुकाधर्मपृष्ठमेतेकुरुक्षेत्रसमागयायां।तथा।दिवौकसांपुष्करिणींसमासाद्यजितेंद्रियः।नदुर्गतिमवाप्नोतिवाजपेयंचविंदतिवा
जपेयंतत्फलंलक्षणायां।अथमाघपदंगच्छेद्ब्रह्मचारीदृढव्रतः।तत्रमाघपदेस्नात्वावाजपेयफलंलभेत्।तत्रकोटिस्मृतीर्थानांविश्रुतंभरतर्ष
भ।तत्राऽभिषेकंकुर्वीततत्तीर्थकोट्यांयुधोवरः।पुंडरीकमवाप्नोतिविष्णुलोकंचगच्छति।अभिषेकःस्नानंपुंडरीकं।यागविशेषफलं।तथा।ब्रह्म

Indira Gandhi National
Centre for the Arts

णः॥सदसिराजेंद्रब्रह्मणा यूपउच्छ्रितः॥यूपंप्रदक्षिणीकृत्यवाजपेयफलंलभेत्॥तथा॥तत्रपुष्करिणीरम्यासुषुम्नानामनामतः॥श्राद्धंभवति
वानंतंतत्रदत्तंमहोदयं॥तथा॥कनकेशंचकेदारंनारसिंहंचवामनं॥रथमार्गसमभ्यर्च्यपितॄन्सर्वान्समुद्धरेत्॥तथा॥द्यंवंप्रकृत्य॥योनिद्वारंचतत्रैवप्रवि
श्य तेभरतर्षभ॥तत्रगत्वाविमुच्यंतेपुरुषापापेनिसंशयः॥तथा॥तत्रैवपंचदिनान्येव॥॥याकृत्यमुक्तं॥वाप्यांस्नानंमतंगस्यधर्मपृष्ठेपरेहनि॥श्राद्धपिंडं
४६ ततः कार्यंमध्याह्नेकूपयूपयोः॥ब्रह्मणः सदसिस्नात्वाकृत्वायूपप्रदक्षिणं॥ततोयदिदिवसेकुर्याच्छ्राद्धंपिंडावसेचनं॥महानद्यामुपस्पृश्यतर्पयेत्पि
तॄन्देवताः॥अक्षयान्लभतेलोकान्कुलंचैवसमुद्धरेत्॥गयाशिरसितकुर्याच्छ्राद्धपिंडांश्चतुर्थके॥पंचमेदिवसेगच्छेद्दृटमक्षयसंज्ञकमिति॥
त्रपुराणांतरेकमान्यत्वेपिभूयस्त्वन्यायेनवायवीयएवोत्पन्नेस्तदनुसारएवकार्यइतिप्रागेवोक्तं॥विशकलिततीर्थान्यपियथाप्रकाशंवायवी
योक्तक्रमेणकार्याणि॥यद्वायथोक्तंयेनकेनचित्क्रमेण॥क्रमतोक्रम[illegible]पिगयायात्रामहाफलेत्याग्नेयोक्तेरित्युक्तमेव॥एवंगयाकृत्येनि
र्वर्तितेततोनिर्गमनकालेगदाधरंपूजास्तुतिप्रार्थनाःकार्याः॥स्तुत्वासंप्रार्थयेद्देवमादिदेवंगदाधरमित्याग्निपुराणवचनात्॥स्तुतिप्रार्थनेप्र

योगेवक्ष्येते॥ ॥इतिश्रीमद्भट्टरामेश्वरसूरिसूनुनारायणभट्टविरचितेत्रिस्थलीसेतौगयाप्रकरणेगयाकृत्यं॥ ॥छ॥विक्रमार्कोक्ते
लेखकवाचकयोर्नमः[illegible]मयाधयारणं[illegible]

Indira Gandhi National
Centre for the Arts